|| ओं श्री गणेश शारदा गुरुभ्यो नमः ||

|| श्री वेदव्यासाय नमः ||

|| अश्वमेधप्रश्नः ||



For copies of this book please contact-
Shri S. Parameswaran
14/52, Manjula,
Pestom Sagar Rd.No.2
Chembur, Mumbai-400 089.
Tel: 2 524 2155

।। श्री गणेश शारदा गुरुभ्यो नमः ।।

।। श्री वेदव्यासाय नमः ।।

अश्वमेध प्रश्नः(१)

तैत्तिरीय यजुर्ब्राह्मणे तृतीयाष्टके अष्टमः प्रश्नः।।



For copies of this book, please contact:-

Shri Parameswara Sharma
14/52, Manjula,
Pestom Sagar Road No. 2,
Chembur, Mumbai- 400 089.
Tel: 524 2155.



।। श्री शृङ्गेरी श्रीजगद्गुरुमहासंस्थानम् ।।



श्रीमत्परमहंसपरिव्राचकाचार्यवर्य पदवाक्यप्रमाणपारावारपारीण यमनियमासनप्राणायाम प्रत्याहार धारणाध्यानसमाध्यष्टाङ्गयोगानिष्ठाननिष्ठ तपश्चक्रवर्त्यनाद्यविच्छिन्न श्रीशङ्कराचार्यगुरुपरम्पराप्राप्त षड्दर्शनस्थापनाचार्य व्याख्यानसिंहासनाधीश्वर सकलनिगमागमसारहृदय सांख्यत्रयप्रतिपादक वैदिकमार्ग प्रवर्तक सर्वतन्त्र-स्वतन्त्रादिराजधानी विद्यानगर महाराजधानी कर्णाटकसिंहासन प्रतिष्ठापनाचार्य श्रीमद्राजाधिराजगुरुभूमण्डलाचार्य ऋष्यशृङ्गपुरवराधीश्वर तुङ्गभद्रातीरवासि श्रीमद्विद्याशङ्करपादपद्माराधक श्रीजगद्गुरु श्रीमदभिनवविद्यातीर्थस्वामि गुरुकरकमलसंञ्जात

।। श्रीजगद्गुरु शृङ्गेरी श्रीमद्भारतीतीर्थस्वामिभिः ।।

अस्मदत्यन्तप्रियशिष्य श्रीपरमेश्वरशर्म विषये नारायणस्मरणपुरस्सर विरचिता आशिषस्समुल्लसन्तु।

भवन्तः वेदमधीत्य शिष्यानध्यापयन्तः अधुना लोकानामुपकाराय अत्यावश्यक वेदभागान् स्थूलाक्षरैः सस्वरं प्रकाशयन्तीति विदित्वा भृशं मोदामहे। अत्र हि रुद्रक्रमः महान्यासः उदकशान्तिरित्यादयः प्रकाशिता ये सर्वेषामत्यन्तमावश्यकाः। भवदीयोऽयमुद्यमः धर्मश्रद्धालूनामास्तिकानां प्रशंसापात्रमिति तु निश्चप्रचम्।

श्री शारदाचन्द्रमौळीश्वरयोरसीमया कृपया इमे ग्रन्थाः आस्तिकजन पाणिपल्लवान्यलंकुर्वन्तु भवन्तश्च श्रेयःपरम्पराभिस्समेधन्तामित्याशास्महे ।।

इति नारायणस्मरणम्


शृङ्गगिरिः

प्रमाथिश्रावणकृष्णाष्टमी भार्गववासरः



३-९-१९९९

SRI GURUBHYO NAMAHA






MUTUAL TRUST — FRIENDSHIP — TOLERANCE —OUR TRADITION

Sri Sankara Jayanthi Celebration Committee

6, Savitha, 70,Pestomsagar, 2nd Road, Tilaknagar P.O., BOMBAY - 89.

Tel. Nos. : 5241864

Date

FOREWORD

Shri Parameswara Sharma has been conducting Veda Classes in Pestom Sagar Chembur, for over two decades, and has trained over a hundred vidyarthis comprising of a wide range of asthikas covering school children, college boys, office-goers and retired elders. He has been associated with our Shri Sankara Jayanthi Celebration Committee for the past 16 years conducting Rudra-japa-abhisheka-puja along with his disciples.

Shri Parameswara Sharma's teaching skill and the recitation of vedic hymns by his disciples have been appreciated by many eminent vedic scholars and patrons of Religious & Cultural Organisations.

A momentous occasion was in June 1994, when, pleased with the excellent Ghana recitation by a few of Parameswara Sharma's young disciples,and in appreciation of his glorious spiritual service,HisHoliness Shri Bharathi Theertha Swamigal, Sringeri Mutt blessed and honoured him with a *'Ponnadai'*

Besides conducting veda classes, Shri Parameswara Sharma devotes his available time in compiling Vedic Literature into convenient books, in bold print, very useful to vidyarthis and religious practioners. He has compiled the following books :-

RUDRAM -CHAMAKAM
RUDRA KRAMAM
CHAMAKA KRAMAM
MAHANYASAM
UDAKA SHANTHI
ACHIDRAM
ASWAMEDHAM (1)

Copies of books compiled by Parameswara Sharma were presented to HIS HOLINESS SHRI BHARATHI THEERTHA SWAMIGAL, for His approval & blessings. His Holiness has gone through the books and has expressed His happiness and said that the books are very good and would be useful to the students

Appreciating his effort & dedication, His Holiness has blessed Shri Parameswara Sharma with a *SHREEMUKHAM.*

I, on behalf of the Sri Sankara Jayanthi Celebration Committee, pray to Almighty to bestow upon Shri Parameswara Sharma, a healthy, blissful and long life to continue his noble social service of propagating Vedas and Vedic Culture among the youth and active citizens.

V. V. Chalam

V. Venkitachalam
Secretary
Sri Sankara Jayanthi Celebration Committee

13th September 1999.

अश्वमेधम् (१)

विषयानुक्रमणिका

अश्वमेधम् (१)

विषयानुक्रमणिका

****

ओं श्रीगणेश शारदा गुरुभ्यो नमः।

श्री वेदव्यासाय नमः।

।। अश्वमेधः प्रश्नः ।।

(तृतीयाष्टके अष्टमः प्रश्नः)

हरिः ओ(४)म्

१ साङ्ग्रहण्येष्ट्या यजते। इमाञ्जनताꣳसङ्गृह्णानीति। द्वादशारत्नी रशना भवति। द्वादश मासा स्सँव्वथ्सरः। सँव्वथ्सरमेवावरुन्धे। मौञ्जी भवति। ऊर्ग्वै मुञ्जाः। ऊर्जमेवावरुन्धे। चित्रा नक्षत्रं भवति। चित्रँव्वा एतत्कर्म। [१]।।

यदश्वमेध स्समृद्ध्यै। पुण्यनाम देवयजनमद्ध्यवस्यति। पुण्यामेव तेन कीर्ति-

मभिजयति। अपदातीनृत्विज स्समावहन्त्या-
सुब्रह्मण्यायाः। सुवर्गस्य लोकस्य समष्ट्यै।
केशश्मश्रु वपते। नखानि निकृन्तते। दतो
धावते। स्नाति। अहतँव्वासः परिधत्ते।
पाप्मनोऽपहत्यै। वाचँय्यत्त्वोपवसति।
सुवर्गस्य लोकस्य गुप्त्यै। रात्रिञ्जागरयन्त
आसते। सुवर्गस्य लोकस्य समष्ट्यै। [२]।।

(कर्म धत्ते पञ्च च)।

*****

अश्वमेधः प्रश्नः(१)

२ चतुष्टय्य आपो भवन्ति। चतुश्शफो वा अश्वः प्राजापत्य स्समृद्ध्यै। ता दिग्भ्य स्समाभृता भवन्ति। दिक्षु वा आपः। अन्नँव्वा आपः। अद्भ्यो वा अन्नञ्जायते। यदेवाद्भ्योऽन्नञ्जायते। तदवरुन्धे। तासु ब्रह्मौदनं पचति। रेत एव तद्दधाति।[३]

चतुश्शरावो भवति। दिक्ष्वेव प्रतितिष्ठति। उभयतो रुक्मौ भवतः। उभयत एवास्मिन्नृचन्दधाति। उद्धरति शृतत्त्वाय। सर्पिष्वान् भवति मेद्ध्यत्त्वाय। चत्वार आर्षेयाः प्राश्ञन्ति। दिशामेव ज्योतिषि जुहोति।

चत्वारि हिरण्यानि ददाति। दिशामेव ज्योतीꣳष्यवरुन्धे।[४]।

यदाज्यमुच्छिष्यते। तस्मिन्नरशनान्युनत्ति। प्रजापतिर्वा ओदनः। रेत आज्यम्। यदाज्ये रशनान्युनत्ति। प्रजापतिमेव रेतसा समर्द्धयति। दर्भमयी रशना भवति। बहुवा एष कुचरोऽमेद्ध्यमुप गच्छति। यदश्वः। पवित्रं वै दर्भाः। [५]।

यद्दर्भमयी रशना भवति। पुनात्येवैनम्। पूतमेनं मेद्ध्यमालभते। अश्वस्य वा आलब्धस्य महिमोदक्रामत्। समहर्त्तविजः

प्राविशत्। तन्महर्त्त्विजां महर्त्त्विक्त्वम्। यन्महर्त्त्विजः प्राश्ञन्ति। महिमानमेवास्मिन्-तद्दधति। अश्वस्य वा आलब्धस्य रेत उदक्रामत्। तथ्सुवर्णꣳ हिरण्यमभवत्। यथ्सुवर्णꣳहिरण्यन्ददाति। रेत एव तद्दधाति। ओदने ददाति। रेतो वा ओदनः। रेतो हिरण्यम्। रेतसैवास्मिन्रेतो दधाति। [६]।।

(दधाति रुन्धे दर्भा अभवथ्षट् च)।।

*****

३ यो वै ब्रह्मणे देवेभ्यः प्रजापतयेऽ
प्रतिप्रोच्याश्वं मेद्ध्यं बद्ध्नाति। आदेवताभ्यो
वृश्च्यते। पापीयान्भवति। यः प्रतिप्रोच्य।
न देवताभ्य आवृश्च्यते। वसीयान्भवति।
यदाह। ब्रह्मन्नश्वं मेद्ध्यं भन्त्स्यामि देवेभ्यः
प्रजापतये तेन राद्ध्यासमिति। ब्रह्म वै ब्रह्म।
ब्रह्मण एव देवेभ्यः प्रजापतये प्रतिप्रोच्याश्वं
मेद्ध्यं बद्ध्नाति। [७]।

न देवताभ्य आवृश्च्यते। वसीयान्भवति।
देवस्य त्वा सवितुः प्रसव इति रशनामादत्ते
प्रसूत्यै। अश्विनो बाहुभ्यामित्याह।

अश्विनौ हि देवानामद्ध्वर्यू आस्ताम्। पूष्णो हस्ताभ्यामित्याह यत्यै। व्यृद्धं वा एतद्यज्ञस्य। यदयजुष्केण क्रियते। इमामगृभ्णन् रशनामृतस्येत्यधि वदति यजुष्कृत्यै। यज्ञस्य समृद्ध्यै। [८]।

तदाहुः। द्वादशारत्नी रशना कर्तव्या (३) त्रयोदशारत्नी (३) रिति। ऋषभो वा एष ऋतूनाम्। यथ्सँवथ्सरः। तस्य त्रयोदशोमासो विष्टपम्। ऋषभ एष यज्ञानाम्। यदश्वमेधः। यथा वा ऋषभस्य विष्टपम्। एवमेतस्य विष्टपम्। त्रयोदशमरत्निꣳ रशनायामुपा-

दधाति। [९]।

यथर्षभस्य विष्टपꣳ सꣳ स्करोति। तादृगेव तत्। पूर्वे आयुषि विदथेषु कव्येत्याह। आयुरेवास्मिन्दधाति। तया देवास्सुतमा बभूवुरित्याह। भूतिमेवोपावर्तते। ऋतस्य सामन् थ्सरमारपन्तीत्याह। सत्यं वा ऋतम्। सत्येनैवैनमृतेनारभते। अभिधा असीत्याह। [१०]।

तस्मादश्वमेधयाजी सर्वाणि भूतान्यभि भवति। भुवनमसीत्याह। भूमानमेवोपैति। यन्ताऽसीत्याह। यन्तारमेवैनं करोति।

धर्ताऽसीत्याह। धर्तारमेवैनं करोति। सोऽग्निँ वैश्वानरमित्याह। अग्नावेवैनँ व्वैश्वानरे जुहोति। सप्रथसमित्याह। [११]।

प्रजयैवैनं पशुभिः प्रथयति। स्वाहाकृत इत्याह। होम एवास्यैषः। पृथिव्यामित्याह। अस्यामेवैनं प्रतिष्ठापयति। यन्ताराड्यन्ताऽसि यमनो धर्ताऽसि धरुण इत्याह। रूपमेवास्यै तन्महिमानँ व्याचष्टे। कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वेत्याह। आशिषमेवैतामाशास्ते। स्वगा त्वा देवेभ्य इत्याह। देवेभ्य एवैनꣳ स्वगा करोति।

अश्वमेधः प्रश्नः(१)

स्वाहा त्वा प्रजापतय इत्याह। प्राजापत्यो वा अश्वः। यस्या एव देवताया आलभ्यते। तयैवैनꣳसमर्द्धयति।। [१२]।।

(बद्ध्नाति समृद्ध्या उपादधात्यसीत्याह सप्रथसमित्याह देवेभ्य इत्याह पञ्च च)।

******

४ यः पितुरनुजायाः पुत्रः। स पुरस्तान्नयति। यो मातुरनुजायाः पुत्रः। स पश्चान्नयति। विष्वञ्चमेवास्मात्पाप्मानँ-व्विवृहतः। यो अर्वन्त- ञ्जिघाꣳसति तमभ्यमीति वरुण इति श्वानञ्चतुरक्षं प्रसौति। परो मर्तः परश्श्वेति शुनश्चतुरक्षस्य प्रहन्ति। श्वेव वै पाप्मा भ्रातृव्यः। पाप्मानमेवास्य भ्रातृव्यꣳ हन्ति। सैद्ध्रकं मुसलं भवति। [१३]।

कर्मकर्मैवास्मै साधयति। पौꣳश्चलेयो हन्ति। पुꣳश्चल्वाँ व्वै देवा श्शुचन्न्यदधुः।

शुचैवास्य शुचꣳ हन्ति। पाप्मा वा एत-
मीप्सतीत्याहुः। योऽश्वमेधेन यजत इति।
अश्वस्याधस्पदमुपास्यति। वज्री वा अश्वः
प्राजापत्यः। वज्रेणैव पाप्मानं भ्रतृव्यमव
क्रामति। दक्षिणाऽपप्लावयति। [१४]।

पाप्मानमेवास्मा- च्छमलमप प्लावयति।
ऐषीक उदूहो भवति। आयुर्वा इषीकाः।
आयुरेवास्मिन्दधति। अमृतँ व्वा इषीकाः।
अमृतमेवास्मिन्दधति। वेतस शाखोप संबद्धा
भवति। अफ्सुयोनिर्वा अश्वः। अफ्सुजो
वेतसः। स्वादेवैनँ य्योने र्निमिमीते। पुरस्तात्

प्रत्यञ्चमभ्युदूहति। पुरस्तादेवास्मिन्प्रतीच्य-
मृतन्दधाति। अहञ्च त्वञ्च वृत्रहन्निति ब्रह्मा
यजमानस्य हस्तं गृह्णाति। ब्रह्म क्षत्रे एव
सन्दधाति। अभिक्रत्वेन्द्रभूरधज्मन्नित्यध्वर्यु-
र्यजमानँ वाचयत्यभिजित्यै।। [१५]।।

(भवति प्लावयति मिमीते पञ्च च)।।

*****

५ चत्वार ऋत्विज स्समुक्षन्ति।
आभ्य एवैन- ञ्चतसृभ्यो दिग्भ्योऽभि-
समीरयन्ति।

शतेन राजपुत्रै स्सहाद्ध्वर्युः। पुरस्तात्
प्रत्यङ् तिष्ठन्प्रोक्षति। अनेनाश्वेन
मेद्ध्येनेष्ट्वा। अयꣳ राजा वृत्रँ वद्ध्यादिति।
राज्यँ व्वा अद्ध्वर्युः। क्षत्रꣳ राजपुत्रः।
राज्येनैवास्मिन् क्षत्रन्दधाति।

शतेनाराजभिरुग्रै- स्सह ब्रह्मा। [१६]।
दक्षिणत उदङ् तिष्ठन्प्रोक्षति। अनेनाश्वेन
मेद्ध्येनेष्ट्वा। अयꣳ राजाऽप्रतिधृष्योऽस्त्विति।

बलँव्वै ब्रह्म। बलमराजोग्रः। बलेनैवास्मिन् बलन्दधाति।

शतेन सूतग्राममणिभि स्सह होता। पश्चात् प्राङ् तिष्ठन्प्रोक्षति। अनेनाश्वेन मेदुध्येनेष्ट्वा। अयꣳ राजाऽस्यै विशः। [१७]।

बहुग्वै बह्वश्वायै बह्वजाविकायै। बहु-व्रीहियवायै बहुमाषतिलायै। बहुहिरण्यायै बहुहस्तिकायै। बहुदासपूरुषायै रयिमत्यै पुष्टिमत्यै। बहुरायस्पोषायै राजाऽस्त्विति। भूमा वै होता। भूमा सूतग्रामण्यः। भूम्नैवास्मिन् भूमानन्दधाति।

शतेन क्षत्तसङ्ग्रहीतृभि स्सहोद्गाता। उत्तरतो दक्षिणा तिष्ठन्प्रोक्षति। [१८]। अनेनाश्वेन मेद्ध्येनेष्ट्वा। अय राजा सर्वमायुरेत्विति। आयुर्वा उद्गाता। आयुः क्षत्तसङ्ग्रहीतारः। आयुषैवास्मिन्नायु र्दधाति।

शत शतं भवन्ति। शतायुः पुरुष-श्शतेन्द्रियः। आयुष्येवेन्द्रिये प्रतितिष्ठति।

चतुश्शता भवन्ति। चतस्रो दिशः। दिक्ष्वेव प्रतितिष्ठति।। [१९]।।

(ब्रह्मा विश उक्षति दिश एकञ्च)।

****

६ यथा वै हविषो गृहीतस्य स्कन्दति। एवँव्वा एतदश्वस्यस्कन्दति। यन्निक्त-मनालब्ध- मुथ्सृजन्ति। यथ्स्तोक्या अन्वाह। सर्वहुतमेवैनङ्-करोत्यस्कन्दाय। अस्कन्नँ हि तत्। यद्धुतस्य स्कन्दति। सहस्रमन्वाह। सहस्र सम्मित स्सुवर्गो लोकः। सुवर्गस्य लोकस्याभिजित्यै। [२०]।।

यत्परिमिता अनुब्रूयात्। परिमितमव-रुन्धीत। अपरिमिता अन्वाह। अपरिमित स्सुवर्गो लोकः। सुवर्गस्य लोकस्य समष्ट्यै। स्तोक्या जुहोति। या एव वर्ष्या आपः।

ता अवरुन्धे। अस्याञ्जुहोति। इयँव्वा अग्नि वैश्वानरः। [२१]।।

अस्यामेवैनाः प्रतिष्ठापयति। उवाच ह प्रजापतिः। स्तोक्यासु वा अहमश्वमेधꣳ सꣳस्थापयामि। तेन तत स्सꣳस्थितेन चरामीति।

अग्नये स्वाहेत्याह। अग्नय एवैनञ्जुहोति। सोमाय स्वाहेत्याह। सोमायैवैनञ्जुहोति। सवित्रे स्वाहेत्याह। सवित्र एवैनञ्जुहोति। [२२]।।

सरस्वत्यैस्वाहेत्याह। सरस्वत्या एवैनञ्जुहोति।

पूष्णे स्वाहेत्याह। पूष्ण एवैनञ्जुहोति। बृहस्पतये स्वाहेत्याह। बृहस्पतय एवैनञ्जुहोति। अपां मोदाय स्वाहेत्याह। अद्भ्य एवैनञ्जुहोति। वायवे स्वाहेत्याह। वायव एवैनञ्जुहोति। [२३]।।

मित्राय स्वाहेत्याह। मित्रायैवैनञ्जुहोति। वरुणाय स्वाहेत्याह। वरुणायैवैनञ्जुहोति। एताभ्य एवैनन्देवताभ्यो जुहोति। दशदश संपादञ्जुहोति। दशाक्षरा विराट्। अन्नँव्विराट्। विराजैवान्नाद्यमवरुन्धे। प्रवा एषोऽस्मा-ल्लोकाच्च्यवते। यः पराचीराहुती

जुहोति। पुनः पुनरभ्यावर्तञ्जुहोति। अस्मिन्नेव लोके प्रतितिष्ठति। एताँ हवा वसोऽश्वमेधस्य सँस्थितिमुवाचास्कन्दाय। अस्कन्नँ हि तत्। यद्यज्ञस्य सँस्थितस्य स्कन्दति। [२४]।।

(अभिजित्यै वैश्वानर स्सवित्र एवैनञ्जुहोति वायव एवैनञ्जुहोति च्यवते षट् च)।।

****

७ प्रजापतये त्वा जुष्टं प्रोक्षामीति पुरस्तात्प्रत्यङ् तिष्ठन्प्रोक्षति। प्रजापति वै देवानामन्नादो वीर्यावान्। अन्नाद्यमेवास्मिन्-वीर्यन्दधाति। तस्मादश्वः पशूनामन्नादो वीर्यावत्तमः।

इन्द्राग्निभ्यान्त्वेति दक्षिणतः। इन्द्राग्नी वै देवानामोजिष्ठौ बलिष्ठौ। ओज एवास्मि-न्बलन्दधाति। तस्मादश्वः पशूनामोजिष्ठो बलिष्ठः।

वायवेत्वेति पश्चात्। वायु वै देवानामाशु स्सारसारितमः। [२५]।।

जवमेवास्मिन्दधाति। तस्मादश्वः पशूनामाशु स्सारसारितमः।

विश्वेभ्यस्त्वा देवेभ्य इत्युत्तरतः। विश्वे वै देवा देवानाँ-य्यशस्वितमाः। यश एवास्मिन्दधाति। तस्मादश्वः पशूनाँ-य्यशस्वितमः।

देवेभ्यस्त्वेत्यधस्तात्। देवा वै देवानामपचिततमाः। अपचितिमेवास्मिन्दधाति। तस्मादश्वः पशूनामपचिततम :। [२६]।

सर्वेभ्यस्त्वा देवेभ्य इत्युपरिष्टात्। सर्वे वै देवास्त्विषिमन्तो हरस्विनः। त्विषिमेवास्मिन् हरो दधाति। तस्मादश्वः

पशूनान्त्विषिमान् हरस्वितमः।

दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वेत्याह। एभ्य एवैनँ-ल्लोकेभ्यः प्रोक्षति।

सते त्वाऽसते त्वाऽद्भ्यस्त्वौषधीभ्यस्त्वा विश्वेभ्यस्त्वा भूतेभ्य इत्याह। तस्मादश्वमेधयाजिनꣳ सर्वाणि भूतान्युप जीवन्ति।

ब्रह्मवादिनो वदन्ति। यत्प्राजापत्योऽश्वः। अथ कस्मादेनमन्याभ्यो देवताभ्योऽपि प्रोक्षतीति। अश्वे वै सर्वा देवता अन्वायत्ताः। तँ-य्यद्विश्वेभ्यस्त्वा भूतेभ्य इति प्रोक्षति।

देवता एवास्मिन्नन्वायातयति। तस्मादश्वे सर्वा देवता अन्वायत्ताः।। [२७]।।

(सारसारितमो ऽपचि ततमः प्राजापत्यो ऽश्वः पञ्च च)।।

****

८ यथा वै हविषो गृहीतस्य स्कन्दति। एवँव्वा एतदश्वस्य स्कन्दति। यत्प्रोक्षित- मनालब्ध- मुत्सृजन्ति। यदश्वचरितानि जुहोति। सर्वहुतमेवैनङ्- करोत्यस्कन्दाय। अस्कन्न ँ हि तत्। यद्धुतस्य स्कन्दति। ईङ्काराय स्वाहेङ्कृताय स्वाहेत्याह। एतानि वा अश्वचरितानि। चरितैरेवैन ँ समर्द्धयति। [२८]।

तदाहुः। अनाहुतयो वा अश्वचरितानि। नैता होतव्या इति। अथो खल्वाहुः।

होतव्या एव। अत्र वावैवँ- व्विद्वानश्वमेधꣳ सꣳस्थापयति। यदश्वचरितानि जुहोति। तस्माद्धोतव्या इति। बहिर्द्धावा एनमेत-दायतनाद्दधाति। भ्रातृव्यमस्मै जनयति।[२९]

यस्यानायतने ऽन्यत्राग्नेराहुती र्जुहोति। सावित्रिया इष्ट्याः पुरस्तात्स्विष्टकृतः। आहवनीयेऽश्वचरितानि जुहोति। आयतन एवास्याहुती र्जुहोति। नास्मै भ्रातृव्य-ञ्जनयति। तदाहुः। यज्ञमुखेयज्ञमुखे होतव्याः। यज्ञस्य क्लृप्त्यै। सुवर्गस्य लोकस्यानुख्यात्या इति। अथो खल्वाहुः। [३०]।।

यद्यज्ञमुखेयज्ञमुखे जुहुयात्। पशुभि
र्यजमानँ-व्व्यर्द्धयेत्। अव सुवर्गाल्लोकात्-
पद्येत। पापीयान्थ्स्यादिति। सकृदेव
होतव्याः। न यजमानं पशुभि व्र्यर्द्धयति।
अभि सुवर्गँ लोकञ्जयति। न पापीयान्भवति।
अष्टाचत्वारिँशतमश्वरूपाणि जुहोति।
अष्टाचत्वारिँशदक्षरा जगती। जागतोऽश्वः
प्राजापत्य स्समृद्ध्यै। एकमतिरिक्तञ्जुहोति।
तस्मादेकः प्रजास्वर्द्धुकः।। [३१]।।

(अर्द्धयति जनयति खल्वाहु जगती त्रीणि च)।

****

९ विभूर्मात्रा प्रभूः पित्रेत्याह। इयँव्वै माता। असौ पिता। आभ्यामेवैनं परिददाति। अश्वोऽसि हयोऽसीत्याह। शास्त्येवैनमेतत्। तस्माच्छिष्टाः प्रजा जायन्ते।
अत्योऽसीत्याह। तस्मादश्व- स्सर्वान्पशू- नत्येति। तस्मादश्व- स्सर्वेषां पशूनाँ श्रैष्ठ्यङ्गच्छति। [३२]।
प्रयश श्श्रैष्ठ्यमाप्नोति। य एवँव्वेद।
नरोऽस्यर्वासि सप्तिरसि वाज्यसीत्याह। रूपमेवास्यै तन्महिमानँ व्याचष्टे।
ययुर्नामासीत्याह। एतद्वा अश्वस्य प्रिय-

न्नामधेयम्। प्रियेणैवैन-न्नामधेयेनाभिवदति। तस्मादप्यामित्रौ सङ्गत्य। नाम्ना चेद्ध्वयेते। मित्रमेव भवतः।। [३३]।

आदित्यानां पत्वान्विहीत्याह। आदित्या-नेवैनङ्गमयति।

अग्नये स्वाहा स्वाहेन्द्राग्निभ्यामिति पूर्व होमाञ्जुहोति। पूर्व एव द्विषन्तं भ्रातृव्यमति-क्रामति।

भूरसि भुवेत्वा भव्याय त्वा भविष्यते त्वेत्युथ्सृजति सर्वत्वाय।

देवा आशापाला एतन्देवेभ्योऽश्वं मेधाय

प्रोक्षितङ्- गोपायतेत्याह। शतँव्वै तल्प्या राजपुत्रा देवा आशापालाः। तेभ्य एवैनं परिददाति। ईश्वरो वा अश्वः प्रमुक्तः परां परावतङ्गन्तोः।

इह धृति स्स्वाहेह विधृति स्स्वाहेह रन्ति स्स्वाहेह रमति स्स्वाहेति चतृषु पथ्सु जुहोति।[३४]।

एता वा अश्वस्य बन्धनम्। ताभिरेवैनं बध्नाति। तस्मादश्वः प्रमुक्तो बन्धनमागच्छति तस्मादश्वः प्रमुक्तो बन्धनन्न जहाति।

राष्ट्रँ व्वा अश्वमेधः। राष्ट्रे खलु वा एते

व्यायच्छन्ते। येऽश्वं मेध्यꣳ रक्षन्ति। तेषाँय्य उदृचङ्गच्छन्ति। राष्ट्रादेव ते राष्ट्रङ्-गच्छन्ति। अथ य उदृचन्न गच्छन्ति। [३५]।

राष्ट्रादेव ते व्यवच्छिद्यन्ते। परा वा एष सिच्यते। योऽबलोऽश्वमेधेन यजते। यदमित्रा अश्वँ व्विन्देरन्न्। हन्येतास्य यज्ञः। चतुश्शता रक्षन्ति। यज्ञस्याघाताय। अथान्यमानीय प्रोक्षेयुः। सैव ततः प्रायश्चित्तिः।। [३६]।।

(गच्छति भवतः पथ्सु जुहोति न गच्छन्ति नव च)।।

****

१० प्रजापतिरकामयताश्वमेधेन यजेयेति। स तपोऽतप्यत। तस्यतेपानस्य। सप्तात्मनो देवता उदक्रामन्न्। सा दीक्षाऽभवत्। स एतानि वैश्वदेवान्यपश्यत्। तान्यजुहोत्। तैर्वै स दीक्षामवारुन्ध। यद्वैश्वदेवानि जुहोति। दीक्षामेव तै र्यजमानोऽवरुन्धे।। [३७]।।

सप्तजुहोति। सप्त हि ता देवता उदक्रामन्न्। अन्वहञ्जुहोति। अन्वहमेव दीक्षामवरुन्धे। त्रीणि वैश्वदेवानि जुहोति। चत्वार्यौद्ग्रहणानि। सप्त संपद्यन्ते। सप्त वै

शीर्षण्याः प्राणाः। प्राणा दीक्षा। प्राणैरेव प्राणान्दीक्षामवरुन्धे। [३८]।।

एकविꣳशतिँ वैश्वदेवानि जुहोति। एकविꣳशति वै देवलोकाः। द्वादश मासाः पञ्चर्तवः। त्रय इमे लोकाः। असावादित्य एकविꣳशः। एष सुवर्गो लोकः। तद्दैव्यङ्क्षत्रम्। सा श्रीः। तद्ब्रध्नस्य विष्टपम्। तथ्स्वाराज्यमुच्यते। [३९]।।

त्रिꣳशतमौद्ग्रहणानि जुहोति। त्रिꣳशदक्षरा विराट्। अन्नँ विराट्। विराजैवान्नाद्यमवरुन्धे। त्रेधा विभज्य देवताञ्जुहोति।

त्र्यावृतो वै देवाः। त्र्यावृत इमे लोकाः।
एषाँ-ल्लोकानामाप्त्यै। एषाँ-ल्लोकानाङ्-
क्लृप्त्यै। अप वा एतस्मात्प्राणाः क्रामन्ति।
[४०]।।

यो दीक्षामतिरेचयति। सप्ताहं प्रचरन्ति।
सप्त वै शीर्षण्याः प्राणाः। प्राणा दीक्षा।
प्राणैरेव प्राणान्दीक्षामवरुन्धे। पूर्णाहुति-
मुत्तमा-ञ्जुहोति। सर्वँ व्वै पूर्णाहुतिः।
सर्वमेवाप्नोति। अथो इयँ व्वै पूर्णाहुतिः।
अस्यामेव प्रतितिष्ठति।। [४१]।।

(रुन्धे प्राणान्दीक्षामवरुन्ध उच्यते क्रामन्ति तिष्ठति)।।

****

११ प्रजापतिरश्वमेधमसृजत। तꣳसृष्टन्न किञ्चनोदयच्छत्। तँव्वैश्वदेवान्येवोदयच्छन्न्। यद्वैश्वदेवानि जुहोति। यज्ञस्योद्यत्यै।

स्वाहाऽऽधिमाधीताय स्वाहा। स्वाहाऽऽधीतं मनसे स्वाहा। स्वाहा मनः प्रजापतये स्वाहा। काय स्वाहा कस्मै स्वाहा कतमस्मै स्वाहेति प्राजापत्ये मुख्ये भवतः। प्रजापतिमुखाभि-रेवैनन्देवताभि-रुद्यच्छते। [४२]।

अदित्यै स्वाहाऽदित्यै मह्यै स्वाहाऽदित्यै सुमृडीकायै स्वाहेत्याह। इयँव्वा अदितिः।

अस्या एवैनं प्रतिष्ठायोद्यच्छते।

सरस्वत्यै स्वाहा सरस्वत्यै बृहत्यै स्वाहा सरस्वत्यै पावकायै स्वाहेत्याह। वाग्वै सरस्वती। वाचैवैनमुद्यच्छते।

पूष्णे स्वाहा पूष्णे प्रपत्थ्याय स्वाहा पूष्णे नरन्धिषाय स्वाहेत्याह। पशवो वै पूषा। पशुभिरेवैनमुद्यच्छते।

त्वष्ट्रे स्वाहा त्वष्ट्रे तुरीपाय स्वाहा त्वष्ट्रे पुरुरूपाय स्वाहेत्याह। त्वष्टा वै पशूनां मिथुनाना॰ँ रूपकृत्। रूपमेव पशुषु दधाति। अथो रूपैरेवैनमुद्यच्छते।

विष्णवे स्वाहा विष्णवे निखुर्यपाय स्वाहा विष्णवे निभूयपाय स्वाहेत्याह। यज्ञो वै विष्णुः। यज्ञायैवैनमुद्यच्छते। पूर्णाहुतिमुत्तमाञ्जुहोति। प्रत्युत्तब्ध्यै सयत्वाय।। [४३]।।

(यच्छते पुरुरूपाय स्वाहेत्याहाष्टौ च)।।

****

१२ सावित्रमष्टाकपालं प्रातर्न्निर्वपति। अष्टाक्षरा गायत्री। गायत्रं प्रातस्सवनम्। प्रातस्सवनादेवैनङ् गायत्रियाश्छन्दसोऽधि निर्मिमीते। अथो प्रातस्सवनमेव तेनाप्नोति। गायत्रीञ्छन्दः।

सवित्रे प्रसवित्र एकादशकपालं मद्ध्यन्दिने। एकादशाक्षरा त्रिष्टुप्। त्रैष्टुभं माद्ध्यन्दिनꣳ सवनम्। माद्ध्यन्दिनादेवैनꣳ सवनात् त्रिष्टुभश्छन्दसो ऽधिनिर्मिमीते। [४४]। अथो माद्ध्यन्दिनमेव सवनन्तेनाप्नोति। त्रिष्टुभञ्छन्दः।

सवित्र आसवित्रे द्वादशकपालमपराह्णे। द्वादशाक्षरा जगती। जागतन्तृतीयसवनम्। तृतीयसवनादेवैन- ञ्जगत्या श्छन्दसोऽधि- निर्मिमीते। अथो तृतीयसवनमेव तेनाप्नोति। जगतीञ्छन्दः।

ईश्वरो वा अश्वः प्रमुक्तः परां परावतङ्गन्तोः। इह धृतिस्स्वाहेह विधृति- स्सवाहेह रन्ति-स्स्वाहेह रमति-स्स्वाहेति चतस्र आहुती र्जुहोति।[४५]।

चतस्रो दिशः। दिग्भिरेवैनं परिगृह्णाति।

आश्वत्थो व्रजो भवति। प्रजापति र्देवेभ्यो

निलायत। अश्वो रूपङ्कृत्वा। सोऽश्वत्थे सँव्वथ्सरमतिष्ठत्। तदश्वत्थस्याश्वत्थत्वम्। यदाश्वत्थो व्रजो भवति। स्व एवैनँ-य्योनौ प्रतिष्ठापयति।। [४६]।।

(त्रिष्टुभश्छन्दसोऽधि निर्मिमीते जुहोति नव च)।।

****

१३ आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामित्याह। ब्राह्मण एव ब्रह्मवर्चस-न्दधाति। तस्मात्पुरा ब्राह्मणो ब्रह्मवर्च-स्यजायत।

आऽस्मिन्राष्ट्रे राजन्य इषव्य श्शूरो महारथो जायतामित्याह। राजन्य एव शौर्यं महिमानन्दधाति। तस्मात्पुरा राजन्य इषव्य-श्शूरो महारथोऽजायत।

दोग्ध्री धेनुरित्याह। धेन्वामेव पयो दधाति। तस्मात्पुरा दोग्ध्री धेनुरजायत।

वोढाऽनड्वानित्याह। [४७]।

अनडुह्येव वीर्यन्दधाति। तस्मात्पुरा वोढा ऽनड्वानजायत।

आशुस्सप्तिरित्याह। अश्व एव जवन्दधाति। तस्मात्पुरा- ऽऽशुरश्वो- ऽजायत।

पुरन्धिर्योषेत्याह। योषित्येव रूपन्दधाति। तस्माथ्स्त्री युवतिः प्रिया भावुका।

जिष्णू रथेष्ठा इत्याह। आह वै तत्र जिष्णू रथेष्ठा जायते। [४८]। यत्रैतेन यज्ञेन यजन्ते।

सभेयो युवेत्याह। यो वै पूर्व वयसि। स सभेयो युवा। तस्माद्युवा पुमान्प्रियो भावुकः।

आऽस्य यजमानस्य वीरो जायता-
मित्याह। आह वै तत्र यजमानस्य वीरो
जायते। यत्रैतेन यज्ञेन यजन्ते।

निकामेनिकामे नः पर्जन्यो वर्षत्वित्याह।
निकामेनिकामे ह वै तत्र पर्जन्यो वर्षति।
यत्रैतेन यज्ञेन यजन्ते।

फलिन्यो न ओषधयः पच्यन्तामित्याह।
फलिन्यो ह वै तत्रौषधयः पच्यन्ते। यत्रैतेन
यज्ञेन यजन्ते।

योगक्षेमो नः कल्पतामित्याह। कल्पते ह
वै तत्र प्रजाभ्यो योगक्षेमः। यत्रैतेन यज्ञेन

यजन्ते।। [४९]।।

(अनड्वानित्याह जायते वर्षति सप्त च)।।

****

१४ प्रजापति र्देवेभ्यो यज्ञान्व्यादिशत्। स आत्मन्नश्वमेधमधत्त। तन्देवा अब्रुवन्न्। एष वाव यज्ञः। यदश्वमेधः। अप्येव नो ऽत्रास्त्विवति। तेभ्य एतानन्नहोमान् प्रायच्छत्। तानजुहोत्। तैर्वै स देवानप्रीणात्। यदन्नहोमाञ्जुहोति। [५०]। देवानेव तै र्यजमानः प्रीणाति।

आज्येन जुहोति। अग्ने र्वा एतद्रूपम्। यदाज्यम्। यदाज्येन जुहोति। अग्निमेव तत्प्रीणाति।

मधुना जुहोति। महत्यै वा एतद्देवतायै

रूपम्। यन्मधु। यन्मधुना जुहोति। [५१]। महतीमेव तद्देवतां प्रीणाति।

तण्डुलै र्जुहोति। वसूनाँव्वा एतद्रूपम्। यत्तण्डुलाः। यत्तण्डुलै र्जुहोति। वसूनेव तत्प्रीणाति।

पृथुकै र्जुहोति। रुद्राणाँव्वा एतद्रूपम्। यत्पृथुकाः। यत्पृथुकै र्जुहोति। [५२]। रुद्रानेव तत्प्रीणाति।

लाजै र्जुहोति। आदित्यानाँव्वा एतद्रूपम्। यल्लाजाः। यल्लाजै र्जुहोति। आदित्यानेव तत्प्रीणाति।

करंबै र्जुहोति। विश्वेषाँव्वा एतद्देवाना७ रूपम्। यत्करंबाः। यत्करंबै र्जुहोति। [५३]। विश्वानेव तद्देवान्प्रीणाति।

धानाभि र्जुहोति। नक्षत्राणाँव्वा एतद्रूपम्। यद्धानाः। यद्धानाभि र्जुहोति। नक्षत्राण्येव तत्प्रीणाति।

सक्तुभि र्जुहोति। प्रजापतेर्वा एतद्रूपम्। यथ्सक्तवः। यथ्सक्तुभि र्जुहोति। [५४]। प्रजापतिमेव तत्प्रीणाति।

मसूस्यै र्जुहोति। सर्वासाँव्वा एतद्देवताना७ रूपम्। यन्मसूस्यानि। यन्मसूस्यै र्जुहोति।

सर्वा एव तद्देवताः प्रीणाति।

प्रियङ्गुतण्डुलै र्जुहोति। प्रियाङ्गा हवै नामैते। एतैर्वै देवा अश्वस्याङ्गानि समदधुः। यत्प्रियङ्गुतण्डुलै र्जुहोति। अश्वस्यैवाङ्गानि सन्दधाति।

दशान्नानि जुहोति। दशाक्षरा विराट्। विराट् कृथ्स्नस्यान्नाद्यस्यावरुद्ध्यै।। [५५]।

(जुहोति मधुना जुहोति पृथुकै र्जुहोति करंबै र्जुहोति सक्तुभि र्जुहोति प्रिय ङ्गुतण्डुलै र्जुहोति चत्वारि च)।।

(अन्नहोमानाज्येनाग्ने र्मधुना तण्डुलैः पृथुकै र्लाजैः करंबै र्धानाभि स्सक्तुभि र्मसूस्यैः प्रिय ङ्गुतण्डुलै र्दशान्नानि विराड् द्वादश)।

****

१५ प्रजापतिरश्वमेधमसृजत। तँ सृष्टँ रक्षाँऽस्यजिघाँसन्। स एतान् प्रजापति र्नक्तँ होमानपश्यत्। तानजुहोत्। तै र्वै स यज्ञाद्रक्षाँऽस्यपाहन्न्। यन्नक्तँ होमाञ्जुहोति। यज्ञादेव तै र्यजमानो रक्षाँऽस्यपहन्ति।

आज्येन जुहोति। वज्रो वा आज्यम्। वज्रेणैव यज्ञाद्रक्षाँऽस्यपहन्ति। [५६]।

आज्यस्य प्रतिपदङ्करोति। प्राणो वा आज्यम्। मुखत एवास्य प्राणन्दधाति।

अन्नहोमाञ्जुहोति। शरीरवदेवावरुन्धे।

व्यत्यासञ्जुहोति। उभयस्यावरुद्ध्यै। नक्तञ्जुहोति। रक्षसामपहत्यै।

आज्येनान्ततो जुहोति। [५७]। प्राणो वा आज्यम्। उभयत एवास्य प्राणन्दधाति। पुरस्ताच्चोपरिष्टाच्च।

एकस्मै स्वाहेत्याह। अस्मिन्नेव लोके प्रतितिष्ठति।

द्वाभ्याँस्वाहेत्याह। अमुष्मिन्नेव लोके प्रतितिष्ठति। उभयोरेव लोकयोः प्रतितिष्ठति। अस्मिँश्चामुष्मिँश्च।

शताय स्वाहेत्याह। शतायुर्वै पुरुष-श्शतवीर्यः। आयुरेव वीर्यमवरुन्धे। सहस्राय स्वाहेत्याह। आयुर्वै सहस्रम्। आयुरेवावरुन्धे। सर्वस्मै स्वाहेत्याह। अपरिमित-मेवावरुन्धे।। [५८]।।

(एव यज्ञाद्रक्षाꣳस्यपहन्त्यन्ततोजुहोति शताय स्वाहेत्याह सप्त च)।।

****

१६ प्रजापतिँ वा एष ईफ्सतीत्याहुः। योऽश्वमेधेन यजत इति। अथो आहुः। सर्वाणि भूतानीति।

एकस्मै स्वाहेत्याह। प्रजापति र्वा एकः। तमेवाप्नोति।

एकस्मै स्वाहा द्वाभ्याꣳ स्वाहेत्यभि पूर्वमाहुती र्जुहोति। अभिपूर्वमेव सुवर्गँल्लोकमेति।

एकोत्तरञ्जुहोति। [५९]। एकवदेव सुवर्गँ ल्लोकमेति।

सन्ततञ्जुहोति। सुवर्गस्य लोकस्य सन्तत्यै।

शताय स्वाहेत्याह। शतायुर्वै पुरुष-शशतवीर्यः। आयुरेव वीर्यमवरुन्धे।

सहस्राय स्वाहेत्याह। आयुर्वै सहस्रम्। आयुरेवावरुन्धे।

अयुताय स्वाहा नियुताय स्वाहा प्रयुताय स्वाहेत्याह। [६०]। त्रय इमे लोकाः। इमानेव लोकानवरुन्धे।

अर्बुदाय स्वाहेत्याह। वाग्वा अर्बुदम्। वाचमेवावरुन्धे।

न्यर्बुदाय स्वाहेत्याह। यो वै वाचो भूमा। तन्न्यर्बुदम्। वाच एव भूमानमवरुन्धे।

समुद्राय स्वाहेत्याह। [६१]। समुद्रमेवाप्नोति।

मद्ध्याय स्वाहेत्याह। मद्ध्यमेवाप्नोति। अन्ताय स्वाहेत्याह। अन्तमेवाप्नोति।

परार्द्धाय स्वाहेत्याह। परार्द्धमेवाप्नोति।

उषसे स्वाहा व्युष्ट्यै स्वाहेत्याह। रात्रिर्वा उषाः। अहर्व्युष्टिः। अहोरात्रे एवावरुन्धे। अथो अहोरात्रयोरेव प्रतितिष्ठति।

ता यदुभयी र्दिवा वा नक्तँव्वा जुहुयात्। अहोरात्रे मोहयेत्।

उषसे स्वाहा व्युष्ट्यै स्वाहोदेष्यते

स्वाहोद्यते स्वाहेत्यनुदिते जुहोति। उदिताय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहेत्युदिते जुहोति। अहोरात्रयोरव्यतिमोहाय।। [६२]।।

(एकोत्तरञ्जुहोति प्रयुताय स्वाहेत्याह समुद्राय स्वाहेत्याहाह व्युंष्टि स्सप्त च)।।

****

१७ विभूर्मात्रा प्रभूः पित्रेत्यश्व-नामानि जुहोति। उभयोरेवैनँ- ल्लोकयो र्नामधेयङ्गमयति।

आयनाय स्वाहा प्रायणाय स्वाहेत्युद्द्रावा ञ्जुहोति। सर्वमेवैनमस्कन्न ७ सुवर्ग-ल्ँलोकङ् गमयति।

अग्न्ये स्वाहा सोमाय स्वाहेति पूर्व-होमाञ्जुहोति। पूर्व एव द्विषन्तं भ्रातृव्यमति-क्रामति।

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहेत्याह। यथायजुरेवैतत्।

अग्नये स्वाहा सोमाय स्वाहेति पूर्वदीक्षा जुहोति। पूर्व एव द्विषन्तं भ्रातृव्यमति-क्रामति। [६३]।

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहेत्येकवि॰ शिनीन्दीक्षाञ्जुहोति। एकवि॰शति वै देवलोकाः। द्वादश मासाः पञ्चर्तवः। त्रय इमे लोकाः। असावादित्य एकवि॰शः। एष सुवर्गो लोकः। सुवर्गस्य लोकस्य समष्ट्यै।

भुवो देवानां कर्मणेत्यृतु दीक्षा जुहोति। ऋतूनेवास्मै कल्पयति।

अग्नये स्वाहा वायवे स्वाहेति

जुहोत्यनन्तरित्यै। [६४]।

अर्वाङ्यज्ञ स्सङ्क्रामत्वित्याप्ती र्जुहोति। सुवर्गस्य लोकस्याप्त्यै।

भूतं भव्यं भविष्यदिति पर्याप्ती र्जुहोति। सुवर्गस्य लोकस्य पर्याप्त्यै।

आमे गृहा भवन्त्वित्याभू र्जुहोति। सुवर्गस्य लोकस्याभूत्यै।

अग्निना तपोऽन्वभवदित्यनुभू र्जुहोति। सुवर्गस्य लोकस्यानुभूत्यै।

स्वाहाऽऽधिमाधीताय स्वाहेति समस्तानि वैश्वदेवानि जुहोति। समस्तमेव द्विषन्तं

भ्रातृव्यमतिक्रामति। [६५]।

दद्भ्यस्स्वाहा हनूभ्याᳪ स्वाहेत्यङ्गहोमा-
ञ्जुहोति। अङ्गेअङ्गे वै पुरुषस्य पाप्मोप-
श्लिष्टः। अङ्गादङ्गादेवैनं पाप्मनस्तेन
मुञ्चति।

अञ्ज्येताय स्वाहा कृष्णाय स्वाहा
श्वेताय स्वाहेत्यश्वरूपाणि जुहोति। रूपैरेवैनᳪ
समर्द्धयति।

ओषधीभ्यस्स्वाहा मूलेभ्यस्स्वाहेत्योषधि-
होमाञ्जुहोति। द्वय्यो वा ओषधयः। पुष्पेभ्यो-
ऽन्याः फलङ्गृह्णन्ति। मूलेभ्योऽन्याः।

ता एवोभयीरवरुन्धे। [६६]।

वनस्पतिभ्य स्स्वाहेति वनस्पतिहोमाञ्जुहोति। आरण्यस्यान्नाद्यस्यावरुद्ध्यै।

मेषस्त्वापचतैरवत्वित्यपाव्यानि जुहोति। प्राणा वै देवा अपाव्याः। प्राणानेवावरुन्धे।

कूप्याभ्य स्स्वाहाऽद्भ्य स्स्वाहेत्यपाँ होमाञ्जुहोति। अफ्सु वा आपः। अन्नँव्वा आपः। अद्भ्यो वा अन्नञ्जायते। यदेवाद्भ्यो ऽन्नञ्जायते। तदवरुन्धे।। [६७]।।

(पूर्वदीक्षा जुहोति पूर्व एव द्विषन्तं भ्रातृव्यमतिक्रामत्यनन्तरित्यै क्रामति रुन्धे जायत एकञ्च)।।

****

१८ अंभाꣳसि जुहोति। अयँव्वै लोकोऽम्भाꣳसि। तस्य वसवोऽधिपतयः। अग्निर्ज्योतिः। यदम्भाꣳसि जुहोति। इममेव लोकमवरुन्धे। वसूनाꣳ सायुज्यङ्गच्छति। अग्निञ्ज्योतिरवरुन्धे।

नभाꣳसि जुहोति। अन्तरिक्षँव्वै नभाꣳसि। [६८]। तस्य रुद्रा अधिपतयः। वायुर्ज्योतिः। यन्नभाꣳसि जुहोति। अन्तरिक्ष-मेवावरुन्धे। रुद्राणाꣳ सायुज्य ङ्गच्छति। वायुञ्ज्योतिरवरुन्धे।

महाꣳसि जुहोति। असौ वै लोको

महाᳪसि। तस्यादित्या अधिपतयः। सूर्यो ज्योतिः। [६९]। यन्महाᳪसि जुहोति। अमुमेव लोकमवरुन्धे। आदित्यानाᳪ सायुज्यङ्गच्छति। सूर्यञ्ज्योतिरवरुन्धे।

नमो राज्ञे नमो वरुणायेति यव्यानि जुहोति। अन्नाद्यस्यावरुद्ध्यै।

मयोभूर्वातो अभिवातूस्रा इति गव्यानि जुहोति। पशूनामवरुद्ध्यै।

प्राणाय स्वाहा व्यानाय स्वाहेति सन्तति-होमाञ्जुहोति। सुवर्गस्य लोकस्य सन्तत्यै। [७०]।

सिताय स्वाहाऽसिताय स्वाहेति प्रमुक्तीर्जुहोति। सुवर्गस्य लोकस्य प्रमुक्त्यै।

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहेत्याह। यथायजुरेवैतत्।

दत्वते स्वाहाऽदन्तकाय स्वाहेति शरीरहोमाञ्जुहोति। पितृलोकमेव तै र्यजमानोऽवरुन्धे।

कस्त्वा युनक्ति सत्वा युनक्त्वति परिधीन् युनक्ति। इमे वै लोकाः परिधयः। इमानेवास्मै लोकान् युनक्ति। सुवर्गस्य लोकस्य समष्ट्यै। [७१]।

यः प्राणतो य आत्मदा इति महिमानौ जुहोति। सुवर्गो वै लोको महः। सुवर्गमेव ताभ्याँ ल्लोकँ य्यजमानोऽवरुन्धे।

आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामिति समस्तानि ब्रह्मवर्चसानि जुहोति। ब्रह्मवर्चसमेव तै र्यजमानोऽवरुन्धे।

जज्ञिबीजमिति जुहोत्यनन्तरित्यै।

अग्नये समनमत् पृथिव्यै समनमदिति सन्नतिहोमाञ्जुहोति। सुवर्गस्य लोकस्य सन्नत्यै।

भूताय स्वाहा भविष्यते स्वाहेति भूताभव्यौ होमौ जुहोति। अयँव्वै लोको

भूतम्। [७२]। असौ भविष्यत्। अनयोरेव लोकयोः प्रतितिष्ठति। सर्वस्याप्त्यै। सर्वस्यावरुद्ध्यै।

यदक्रन्दः प्रथमञ्जायमान इत्यश्वस्तोमीयञ्जुहोति। सर्वस्याप्त्यै। सर्वस्य जित्यै। सर्वमेव तेनाप्नोति। सर्वञ्जयति। योऽश्वमेधेन यजते। [७३]।

य उ चैनमेवँव्वेद।

यज्ञꣳ रक्षाꣳस्यजिघाꣳसन्न्। स एतान् प्रजापति र्नक्तꣳ होमानपश्यत्। तानजुहोत्। तै र्वै स यज्ञाद्रक्षाꣳस्यपाहन्न्। यन्नक्तꣳ

होमाञ्जुहोति। यज्ञादेव तै र्यजमानो रक्षाꣳ स्यपहन्ति।

उषसे स्वाहा व्युष्ट्यै स्वाहेत्यन्ततो जुहोति। सुवर्गस्य लोकस्य समष्ट्यै। [७४]

(वै नभाꣳसि सूर्यो ज्योति स्सन्तत्यै समष्ट्यै भूतँय्यजते नव च)।।

****

१९ एकयूपो वैकादशिनी वा।
अन्येषाँ-य्यज्ञानाँ-य्यूपा भवन्ति। एकविꣳशि-
न्यश्वमेधस्य। सुवर्गस्य लोकस्याभिजित्यै।

बैल्वो वा खादिरो वा पालाशो वा।
अन्येषाँ -य्यज्ञक्रतूनाँ-य्यूपा भवन्ति।

राज्जुदाल एकविꣳशत्यरत्निरश्वमेधस्य।
सुवर्गस्य लोकस्य समष्ट्यै।

नान्येषां पशूनान्तेजन्या अवद्यन्ति।
अवद्यन्त्यश्वस्य। [७५]। पाप्मा वै तेजनी।
पाप्मनोऽपहत्यै।

प्लक्षशाखायामन्येषां पशूनामवद्यन्ति।

वेतसशाखायामश्वस्य। अफ्सुयोनि र्वा अश्वः। अफ्सुजो वेतसः। स्व एवास्य योनावववद्यति।

यूपेषु ग्राम्यान्पशून्नियुञ्जन्ति। आरोके-ष्वारण्या- न्धारयन्ति। पशूनाँ-व्व्यावृत्त्यै। आग्राम्यान्पशूँल्लभन्ते। प्रारण्यान्थ्सृजन्ति। पाप्मनोऽपहत्यै।। [७६]।।

(अश्वस्य व्यावृत्त्यै त्रीणि च)।।

****

२० राज्जुदालमग्निष्ठम्मिनोति। भ्रूणहत्याया अपहत्यै। पौतुद्रवावभितो भवतः। पुण्यस्य गन्धस्यावरुद्ध्यै। भ्रूणहत्यामेवा-स्मादपहत्य। पुण्येन गन्धेनोभयतः परि-गृह्णाति।

षड्बैल्वा भवन्ति। ब्रह्मवर्चसस्या-वरुद्ध्यै।

षट्खादिराः। तेजसोऽवरुद्ध्यै। [७७]।

षट्पालाशाः। सोमपीथस्यावरुद्ध्यै।

एकविꣳशति- स्संपद्यन्ते। एकविꣳशति वै देवलोकाः। द्वादश मासाः पञ्चर्तवः।

त्रयं इमे लोकाः। असावादित्य एकविꣳशः। एष सुवर्गो लोकः। सुवर्गस्य लोकस्य समष्ट्यै।

शतं पशवो भवन्ति। [७८]।

शतायुः पुरुष श्शतेन्द्रियः। आयुष्येवेन्द्रिये प्रतितिष्ठति। सर्वँव्वा अश्वमेद्ध्याप्नोति।

अपरिमिता भवन्ति। अपरिमितस्यावरुद्ध्यै।

ब्रह्मवादिनो वदन्ति। कस्माथ्सत्यात्। दक्षिणतोऽन्येषां पशूनामवद्यन्ति। उत्तरतोऽश्वस्येति। वारुणो वा अश्वः। [७९]।

एषा वै वरुणस्य दिक्। स्वायामेवास्य दिश्यवद्यति। यदितरेषां पशूनामवद्यति। शतदेवत्यन्तेनावरुन्धे।

चितेऽग्नावधिवैतसे कटेऽश्वञ्चिनोति। अप्सुयोनि र्वा अश्वः। अप्सुजो वेतसः। स्व एवैनँ य्योनौ प्रतिष्ठापयति।

पुरस्तात्प्रत्यञ्च- न्तूपरञ्चिनोति। पश्चात्प्राचीनङ् गोमृगम्। [८०]। प्राणापानावेवास्मिन्थ्सम्यञ्चौ दधाति।

अश्वन्तूपरङ्- गोमृगमिति सर्वहुत एता- ञ्जुहोति। एषाँल्लोकानामभिजित्यै।

आत्मनाऽभिजुहोति। सात्मानमेवैनꣳ सतनुङ्करोति। सात्माऽमुष्मिन् लोके भवति। य एवँव्वेद। अथो वसोरेव धारान्तेनावरुन्धे।

इलुवर्दाय स्वाहा बलिवर्दाय स्वाहेत्याह। सँव्वथ्सरो वा इलुवर्दः। परिवथ्सरो बलिवर्दः। सँव्वथ्सरादेव परिवथ्सरादायुरवरुन्धे। आयुरेवास्मिन्दधाति। तस्मादश्वमेधयाजी जरसा विस्रसाऽमुँल्लोकमेति।। [८१]।।

(तेजसोऽवरुद्ध्यै भवन्त्यश्वो गोमृगमिलुवर्द श्चत्वारि च)।।

****

२१ एकवि॰शोऽग्नि र्भवति। एकवि॰शस्स्तोमः। एकवि॰शतिर्यूपाः। यथा वा अश्वा-वरृषभा वा वृषाण-स्सꣳस्फुरेरन्न्। एवमेतथ्स्तोमा-स्सꣳस्फुरन्ते। यदेकवि॰शाः। ते यथ्संमृच्छेरन्न्। हन्येतास्य यज्ञः।

द्वादश एवाग्निस्स्यादित्याहुः। द्वादश स्स्तोमः। [८२]।

एकादश यूपाः। यद्द्वादशोऽग्नि र्भवति। द्वादश मासा स्सँव्वथ्सरः। सँव्वथ्सरेणैवास्मा अन्नमवरुन्धे।

यद्दश यूपा भवन्ति। दशाक्षरा विराट्।

अन्नँ व्विराट्। विराजैवान्नाद्य- मवरुन्धे। य एकादशः। स्तन एवास्यै सः। [८३]। दुह एवैनान्तेन।

तदाहुः। यद्द्वादशोऽग्नि स्स्याद्द्वादश स्स्तोम एकादश यूपाः। यथा सथूरिणायायात्। तादृक्तत्।

एकविꣳश एवाग्नि स्स्यादित्याहुः। एकविꣳश स्स्तोमः। एकविꣳशति र्यूपाः। यथा प्रष्टिभिर्याति। तादृगेव तत्। [८४]।

यो वा अश्वमेधे तिस्रः ककुभो वेद। ककुद्ध राज्ञां भवति। एकविꣳशोऽग्निर्भवति।

एकवि॒ꣳश॒स्स्तोमः॑ एक॑वि॒ꣳशति॒ यू॒पाः᳚। ए॒ता वा अ॑श्वमे॒धे ति॒स्रः क॒कुभः॑। य ए॒वँव्वेद॑। क॒कुद्ध॒ राज्ञां᳚ भवति।

यो वा अ॑श्वमे॒धे त्रीणि॑ शी॒र्॒षाणि॒ वेद॑। शिरो॑ ह॒ राज्ञां᳚ भवति। ए॒क॒वि॒ꣳशो᳚ऽग्नि र्भ॑वति। ए॒क॒वि॒ꣳश॒स्स्तोमः॑। एक॑वि॒ꣳशति॒ यू॒पाः᳚। ए॒ताने॒ वा अ॑श्वमे॒धे त्रीणि॑ शी॒र्॒षाणि॑। य ए॒वँव्वेद॑। शिरो॑ ह॒ राज्ञां᳚ भवति।। [८५]।

(द्वा॒द॒श स्स॒तोम॒ स्स ए॒व तच्छिरो॑ ह॒ राज्ञां᳚ भवति॒ षट् च॑)।।

****

२२ देवा वा अश्वमेधे पवमाने।
सुवर्गल्ँलोकन्न प्राजानन्न्। तमश्वः प्राजानात्।
यदश्वमेधेऽश्वेन मेद्ध्येनोदञ्चो बहिष्पवमानꣳ
सर्पन्ति। सुवर्गस्य लोकस्य प्रज्ञात्यै।

न वै मनुष्य-स्सुवर्गल्लोँकमञ्जसा वेद।
अश्वो वै सुवर्गँ ल्लोकमञ्जसा वेद।
यदुद्गातोद्गायेत्। यथाऽक्षेत्रज्ञोऽन्येन पथा
प्रतिपादयेत्। तादृक्तत्। [८६]।

उद्गातारमपरुद्ध्य। अश्वमुद्गीथाय
वृणीते। यथा क्षेत्रज्ञोऽञ्जसा नयति।
एवमेवैनमश्व-स्सुवर्गँ-ल्लोकमञ्जसा नयति।

पुच्छमन्वारभन्ते। सुवर्गस्यलोकस्य समष्ट्यै। हिङ्करोति। सामैवाकः। हिङ्करोति। उद्गीथ एवास्य सः। [८७]।

वडबा उपरुन्धन्ति। मिथुनत्वाय प्रजात्यै। अथो यथोपगातार उपगायन्ति। तादृगेव तत्।

उदगासीदश्वो मेद्ध्य इत्याह। प्राजापत्यो वा अश्वः। प्रजापतिरुद्गीथः। उद्गीथमेवावरुन्धे। अथो ऋक्सामयोरेव प्रतितिष्ठति।

हिरण्येनोपाकरोति। ज्योतिर्वै हिरण्यम्। ज्योतिरेव मुखतो दधाति। यजमाने च

प्रजासु च। अथो हिरण्यज्योतिरेव यजमान-
स्सुवर्गल्लँलोकमेति।। [८८]।।

(तथ्स उपाकरोति चत्वारि च)।।

****

२३ पुरुषो वै यज्ञः। यज्ञः प्रजापतिः यदश्वे पशून्नियुञ्जन्ति। यज्ञादेव तद्यज्ञं प्रयुङ्क्ते। अश्वन्तूपरङ्गोमृगम्। तानग्निष्ठ आलभते। सेनामुखमेव तथ्सँश्यति। तस्माद्राजमुखं भीष्मं भावुकम्। आग्नेयङ्कृष्णग्रीवं पुरस्ताल्ललाटे। पूर्वाग्नि-मेव तङ्कुरुते। [८९]।

तस्मात्पूर्वाग्निं पुरस्ताथ्स्थापयन्ति।

पौष्णमन्वञ्चम्। अन्नँव्वै पूषा। तस्मात्पूर्वाग्नावाहार्यमाहरन्ति। ऐन्द्रापौष्ण-मुपरिष्टात्। ऐन्द्रो वै राजन्योऽन्नं पूषा।

अन्नाद्येनैवैनमुभयतः परिगृह्णाति। तस्मा-द्राजन्योऽन्नादो भावुकः।

आग्नेयौ कृष्णग्रीवौ बाहुवोः। बाहुवोरेव वीर्यन्धत्ते। [९०]। तस्माद्राजन्यो बाहुबली भावुकः।

त्वाष्ट्रौ लोमशसक्थौ सक्थ्योः। सक्थ्योरेव वीर्यन्धत्ते। तस्माद्राजन्य ऊरुबली भावुकः।

शितिपृष्ठौ बार्हस्पत्यौ पृष्ठे। ब्रह्मवर्चस-मेवोपरिष्टाद्धत्ते। अथो कवचे एवैते अभितः पर्यूहते। तस्माद्राजन्यस्सन्नद्धो वीर्यङ्करोति।

धात्रे पृषोदरमधस्तात्। प्रतिष्ठामेवैताङ्-कुरुते। अथो इयँव्वै धाता। अस्यामेव प्रतितिष्ठति।

सौर्यं बलक्षं पुच्छे। उथ्सेधमेव तङ्कुरुते। तस्मादुथ्सेधं भये प्रजा अभि-सꣳश्रयन्ति।। [९१]।।

(कुरुते धत्ते कुरुते पञ्च च)।।

।। हरिः ओ(३)म् ।।

****

अश्वमेधः प्रश्नः(१)

[साङ्ग्रहण्या चतुष्टय्यो यो वै यः पितुश्चत्वारो यथानिरुक्तं प्रजापतये यथा प्रोक्षितं विभूराह प्रजापतिरकामयताश्वमेधेन प्रजापतिर्न किञ्चन सावित्रमाब्रह्मन्प्रजापति र्देवेभ्यः प्रजापती रक्षाᳬसि प्रजापतिमीप्सति विभूरश्वनामान्यम्भाᳬस्येकयूपो राज्जुदाल- मेकविᳬशो देवाः पुरुषस्त्रयोविᳬशतिः]।।

[साङ्ग्रहण्या तस्मादश्वमेधयाजी यत्परिमिता यद्यज्ञमुखे यो दीक्षान्देवानेव त्रय इमे सिताय प्राणापानावेवास्मिन्तस्माद्राजन्य एकनवतिः]।।

साङ्ग्रहण्या सᳬश्रयन्ति।।

।। इति तैत्तिरीय यजुर्ब्राह्मणे तृतीयाष्टके अष्टमः प्रश्नः समाप्तः ।। हरिः ओ(३)म् ।।

****

।। ओं श्रीगणेश शारदा गुरुभ्यो नमः ।।

।। श्री वेदव्यासाय नमः ।।

२

।। अश्वमेधः प्रश्नः ।।

(तृतीयाष्टके नवमः प्रश्नः)

For copies of this book please contact-
S.Parameswaran
14/52 Manjula, Pestom Sagar
Chembur, Mumbai - 400 089
Tel: 524 2155.

अश्वमेधः प्रश्नः

विषयानुक्रमणिका

अश्वमेधः प्रश्नः

विषयानुक्रमणिका

तृतीयाष्टके चतुर्थः प्रश्नः।

तृतीयाष्टके चतुर्थः प्रश्नः

विषयानुक्रमणिका

****

।। श्री गणेश शारदा गुरुभ्यो नमः ।।

।। श्री वेदव्यासाय नमः ।।

।। अश्वमेधः प्रश्नः-२ ।।

(तृतीयाष्टके नवमः प्रश्नः)

हरिः ओ(४)म्

(१) प्रजापतिरश्वमेधमसृजत। सोऽस्मा - थ्सृष्टो ऽपाक्रामत्। तमष्टादशिभिरनु प्रायुङ्क्त। तमाप्नोत्। तमाप्त्वाऽष्टादशिभि- रवारुन्ध। यदष्टादशिन आलभ्यन्ते। यज्ञ- मेव तैराप्त्वा यजमानोऽवरुन्धे। सँव्वथ्सरस्य वा एषा प्रतिमा। यदष्टादशिनः। द्वादश मासाः पञ्चर्तवः।[१]।।

अश्वमेधः प्रश्नः(२)

सँव्वथ्सरोऽष्टादशः। यदष्टादशिन आलभ्यन्ते। सँव्वथ्सरमेव तैराप्त्वा यजमानोऽवरुन्धे। अग्निष्ठेऽन्यान्पशूनुपाकरोति। इतरेषु यूपेष्वष्टादशिनोऽजामित्वाय। नवनवालभ्यन्ते सवीर्यत्वाय। यदारण्यैस्स ॐ स्थापयेत्। व्यवस्येतां पितापुत्रौ। व्यद्ध्वानः क्रामेयुः। विदूरङ्ग्रामयोर्ग्रामान्तौ स्याताम्।[२]।।

ऋक्षीकाः पुरुषव्याघ्राः परिमोषिण आव्याधिनीस्तस्करा अरण्येष्वाजायेरन्न्। तदाहुः। अपशवो वा एते। यदारण्याः।

अश्वमेधः प्रश्नः(२)

यदारण्यै स्स ँ स्थापयेत्। क्षिप्रे यजमान-
मरण्यं मृत ँ हरेयुः। अरण्यायतना ह्यारण्याः
पशव इति। यत्पशून्नालभेत। अनवरुद्धा
अस्य पशवस्स्युः। यत्पर्यग्निकृतानुथ्सृजेत्।
[३]।।

यज्ञवेशसङ्कुर्यात्। यत्पशूनालभते।
तेनैव पशूनवरुन्धे। यत्पर्यग्निकृतानुथ्सृजत्य-
यज्ञवेशसाय। अवरुद्धा अस्य पशवो
भवन्ति। न यज्ञवेशसं भवति। न यजमान-
मरण्यं मृत ँ हरन्ति। ग्राम्यै स्स ँ स्थापयति।
एते वै पशवः क्षेमो नाम।

संपितापुत्रावववस्यतः। समद्ध्वानः क्रामन्ति। समन्तिकङ्ग्रामयोर्ग्रामान्तौ भवतः। नर्क्षीकाः पुरुषव्याघ्राः परिमोषिण आव्याधिनीस्तस्करा अरण्येष्वाजायन्ते।।[४]।।

(ऋतवस्स्यातामुथ्सृजेथ्स्यतस्त्रीणि च)।।

****

(२) प्रजापतिरकामयतोभौ लोकाववरुन्धीयेति। स एतानुभयान्पशूनपश्यत्। ग्राम्याꣳश्चारण्याꣳश्च। तानालभत। तैर्वै स उभौ लोकाववारुन्ध। ग्राम्यैरेव पशुभिरिमँल्लोकमवारुन्ध। आरण्यैरमुम्। यद्ग्राम्यान् पशूनालभते। इममेव तैर्लोकमवरुन्धे। यदारण्यान्। [५]।।

अमुन्तैः। अनवरुद्धो वा एतस्य सँव्वथ्सर इत्याहुः। य इतइत श्चातुर्मास्यानि सँव्वथ्सरं प्रयुङ्क्त इति। एतावान् वै सँव्वथ्सरः। यच्चातुर्मास्यानि।

अश्वमेधः प्रश्नः(२)

यदेते चातुर्मास्याः पशव आलभ्यन्ते। प्रत्यक्षमेव तै स्सँव्वथ्सरँ-य्यजमानोऽवरुन्धे। विवा एष प्रजया पशुभिर् ऋद्ध्यते। यस्सँव्वथ्सरं प्रयुङ्क्ते। सँव्वथ्सर-स्सुवर्गो लोकः।। [६]।।

सुवर्गन्तु लोकन्नापराद्ध्नोति। प्रजा वै पशव एकादशिनी। यदेत ऐकादशिनाः पशव आलभ्यन्ते। साक्षादेव प्रजां पशून् यजमानोऽवरुन्धे। प्रजापति र्विराजमसृजत। सा सृष्टाऽश्वमेधं प्राविशत्। तान्दशिभिरनु प्रायुङ्क्त। तामाप्नोत्। तामाप्त्वा दशिभिरवारुन्ध।

अश्वमेधः प्रश्नः(२)

यद्दशिन आलभ्यन्ते।। [७]।।

विराजमेव तैराप्त्वा यजमानोऽवरुन्धे। एकादश दशत आलभ्यन्ते। एकादशाक्षरा त्रिष्टुप्। त्रैष्टुभाः पशवः। पशूनेवावरुन्धे। वैश्वदेवो वा अश्वः। नानादेवत्याः पशवो भवन्ति। अश्वस्य सर्वत्त्वाय। नानारूपा भवन्ति। तस्मान्नाना रूपाः पशवः। बहुरूपा भवन्ति। तस्माद्- बहुरूपाः पशव-स्समृद्ध्यै।। [८]।। *(आरण्याल्लोको दशिन आलभ्यन्ते नानारूपाः पशवो द्वे च)।।*

****

अश्वमेधः प्रश्नः(२)

(३) अस्मै वै लोकाय ग्राम्याः पशव आलभ्यन्ते। अमुष्मा आरण्याः। यद्ग्राम्यान् पशूनालभते। इममेव तै र्लोकमवरुन्धे। यदारण्यान्। अमुन्तैः। उभयान्पशूनालभते। ग्राम्या ँ श्चारण्या ँ श्च। उभयोर्लोकयोरवरुद्ध्यै। उभयान्पशूनालभते।। [१]।।

ग्राम्या ँ श्चारण्या ँ श्च। उभयस्यान्नाद्यस्यावरुद्ध्यै। उभयान्पशूनालभते। ग्राम्या ँ श्चारण्या ँ श्च। उभयेषाम्पशूनामवरुद्ध्यै। त्रयस्त्रयो भवन्ति। त्रय इमे लोकाः। एषाँ- ल्लोकानामाप्त्यै।

अश्वमेधः प्रश्नः(२)

ब्रह्मवादिनो वदन्ति। कस्माथ्सत्यात्।[१०]।।

अस्मिँल्लोके बहवः कामा इति।

यथ्समानीभ्यो देवताभ्यो ऽन्येन्ये पशव

आलभ्यन्ते। अस्मिन्नेव तल्लोके कामान्दधाति।

तस्मादस्मिँल्लोके बहवः कामाः। त्रयाणा-

न्त्रयाणा ँ सहवपा जुहोति। त्र्यावृतो वै देवाः।

त्र्यावृत इमे लोकाः। एषाँल्लोकानामाप्त्यै।

एषाँ ल्लोकाना- ङ्क्लृप्त्यै। पर्यग्निकृता-

नारण्यानुथ्सृजन्त्यहि ँ सायै।। [११]।।

(लोकयोरवरुद्ध्या उभयान्पशूनालभते सत्या-

दहि ँ सायै)।। *********

(४) युञ्जन्ति ब्रध्नमित्याह। असौ वा आदित्यो ब्रध्नः। आदित्यमेवास्मै युनक्ति। अरुषमित्याह। अग्नि र्वा अरुषः। अग्निमेवास्मै युनक्ति। चरन्तमित्याह। वायुर्वै चरन्न्। वायुमेवास्मै युनक्ति। परितस्थुष इत्याह। [१२]।।

इमे वै लोकाः परितस्थुषः। इमानेवास्मै लोकान् युनक्ति। रोचन्ते रोचना दिवीत्याह। नक्षत्राणि वै रोचना दिवि। नक्षत्राण्येवास्मै रोचयति। युञ्जन्त्यस्य काम्येत्याह। कामानेवास्मै युनक्ति। हरीविपक्षसेत्याह।

इमे वै हरीविपक्षसा। इमे एवास्मै युनक्ति। [१३]।।

शोणाधृष्णू नृवाहसेत्याह। अहोरात्रे वै नृवाहसा। अहोरात्रे एवास्मै युनक्ति। एता एवास्मै देवता युनक्ति। सुवर्गस्य लोकस्य समष्ट्यै। केतुङ्कृण्वन्नकेतव इति दृध्वजं प्रतिमुञ्चति। यश एवैन ँ राज्ञाङ्गमयति। जीमूतस्येव भवति प्रतीकमित्याह। यथा यजुरेवैतत्। ये ते पन्थान स्सवितः पूर्व्यास इत्यदृध्वर्यु र्यजमानँ व्वाचयत्यभिजित्यै।[१४]।

परा वा एतस्य यज्ञ एति। यस्य पशु-

रुपाकृतो न्यत्रवेद्या एति। एतꣳ स्तोतरेतेन पथा पुनरश्वमावर्तयासिन इत्याह। वायुर्वै स्तोता। वायुमेवास्य परस्ताद्दधात्यावृत्त्यै। यथा वै हविषो गृहीतस्य स्कन्दति। एवँव्वा एतदश्वस्य स्कन्दति। यदस्योपाकृतस्य लोमानि शीयन्ते। यद्वालेषु काचानावयन्ति। लोमान्येवास्य तथ्संभरन्ति। [१५]।।

भूर्भुवस्सुवरिति प्राजापत्याभिरावयन्ति। प्राजापत्यो वा अश्वः। स्वयैवैनन्देवतया समर्द्धयन्ति। भूरिति महिषी। भुव इति वावाता। सुवरिति परिवृक्ती। एषाँल्लोकाना-

मभिजित्यै। हिरण्ययाः काचा भवन्ति। ज्योति वै हिरण्यम्। राष्ट्रमश्वमेधः। [१६]।।

ज्योतिश्चैवास्मै राष्ट्रञ्च समीची दधाति। सहस्रं भवन्ति। सहस्रसम्मित स्सुवर्गो लोकः। सुवर्गस्य लोकस्याभिजित्यै। अप वा एतस्मात्तेज इन्द्रियं पशव श्श्रीः क्रामन्ति। योऽश्वमेधेन यजते। वसवस्त्वा-ऽञ्जन्तु गायत्रेण छन्दसेति महिष्यभ्यनक्ति। तेजो वा आज्यम्। तेजो गायत्री। तेजसैवास्मै तेजोऽवरुन्धे। [१७]।।

रुद्रास्त्वाऽञ्जन्तु त्रैष्टुभेन छन्दसेति

वावाता। तेजो वा आज्यम्। इन्द्रियन्त्रिष्टुप्। तेजसैवास्मा इन्द्रियमवरुन्धे। आदित्यास्त्वा- ऽञ्जन्तु जागतेन छन्दसेति परिवृक्ती। तेजो वा आज्यम्। पशवो जगती। तेजसैवास्मै पशूनवरुन्धे। पत्नयोऽभ्यञ्जन्ति। श्रिया वा एतद्रूपम्। [१८]।।

यत्पत्नयः। श्रियमेवास्मिन्तद्दधति। नास्मात्तेज इन्द्रियं पशव श्श्रीरपक्रामन्ति। लाजी(३) ञ्छाची(३) न् यशो ममाँ(४) इत्यतिरिक्तमन्नमश्वायोपाहरन्ति। प्रजामेवा- न्नादीङ्कुर्वते। एतद्देवा अन्नमत्तैतदन्नमद्धि

अश्वमेधः प्रश्नः(२)

प्रजापत इत्याह। प्रजायामेवान्नाद्यन्दधते। यदि नावजिघ्रेत्। अग्निः पशुरासीदित्यवघ्रापयेत्। अवहैव जिघ्रति। आक्रान् वाजी क्रमै-रत्यक्रमी- द्वाजी द्यौस्ते पृष्ठं पृथिवी सधस्थ-मित्यश्व- मनुमन्त्रयते। एषाँ- ल्लोकाना-मभिजित्यै। समिद्धो अञ्जन्कृदरं मतीना-मित्यश्वस्याप्रियो भवन्ति सरूपत्वाय।

[१९]।।

(परितस्थुष इत्याहेमे एवास्मै युनक्त्यभिजित्यै भरन्त्यश्वमेधो रुन्धे रूपञ्जिघ्रति त्रीणि च)।।

****

(५) तेजसा वा एष ब्रह्मवर्चसेन व्यृद्ध्यते। योऽश्वमेधेन यजते। होता च ब्रह्मा च ब्रह्मोद्यँव्वदतः। तेजसा चैवैनं ब्रह्मवर्चसेन च समर्द्धयतः। दक्षिणतो ब्रह्मा भवति। दक्षिणत आयतनो वै ब्रह्मा। बार्हस्पत्यो वै ब्रह्मा। ब्रह्मवर्चसमेवास्य दक्षिणतो दधाति। तस्माद्दक्षिणोऽर्द्धो ब्रह्मवर्चसितरः। उत्तरतो होता भवति। [२०]।।

उत्तरत आयतनो वै होता। आग्नेयो वै होता। तेजो वा अग्निः। तेज एवास्योत्तरतो दधाति। तस्मादुत्तरोऽर्द्धस्तेजस्वितरः।

यूपमभितो वदतः। यजमानदेवत्यो वै यूपः। यजमानमेव तेजसा च ब्रह्मवर्चसेन च समर्द्धयतः। किꣳस्विदासीत्पूर्वचित्तिरित्याह। द्यौर्वै वृष्टिः पूर्वचित्तिः। [२१]।।

दिवमेव वृष्टिमवरुन्धे। किꣳस्विदासीद् बृहद्वय इत्याह। अश्वो वै बृहद्वयः। अश्वमेवावरुन्धे। किꣳस्विदासीत्पिशङ्गिले-त्याह। रात्रिर्वै पिशङ्गिला। रात्रिमेवावरुन्धे। किꣳ स्विदासीत्पिलिप्पिलेत्याह। श्रीर्वै पिलिप्पिला। अन्नाद्यमेवावरुन्धे। [२२]।।

कस्स्विदेकाकी चरतीत्याह। असौ वा

आदित्य एकाकी चरति। तेज एवावरुन्धे। क उस्विज्जायते पुनरित्याह। चन्द्रमा वै जायते पुनः। आयुरेवावरुन्धे। किꣳ स्विद्धिमस्य भेषजमित्याह। अग्निर्वै हिमस्य भेषजम्। ब्रह्मवर्चसमेवावरुन्धे। किꣳ स्विदावपनं महदित्याह। [२३]।।

अयँव्वै लोक आवपनं महत्। अस्मिन्नेव लोके प्रतितिष्ठति। पृच्छामि त्वा परमन्तं पृथिव्या इत्याह। वेदिर्वै परोऽन्तः पृथिव्याः। वेदिमेवावरुन्धे। पृच्छामि त्वा भुवनस्य नाभिमित्याह। यज्ञो वै भुवनस्य नाभिः।

अश्वमेधः प्रश्नः(२)

यज्ञमेवावरुन्धे। पृच्छामि त्वा वृष्णो अश्वस्य

रेत इत्याह। सोमो वै वृष्णो अश्वस्य रेतः।

सोमपीथमेवावरुन्धे। पृच्छामि वाचः परमँ-

व्योमेत्याह। ब्रह्म वै वाचः परमँ व्योम।

ब्रह्मवर्चसमेवावरुन्धे। [२४]।।

(होता भवति वै वृष्टिः पूर्वचित्ति- रन्नाद्यमेवावरुन्धे महदित्याह सोमो वै वृष्णो अश्वस्य रेत श्चत्वारि च)।।

****

अश्वमेधः प्रश्नः(२)

(६) अप वा एतस्मात्प्राणाः क्रामन्ति। योऽश्वमेधेन यजते। प्राणाय स्वाहा व्यानाय स्वाहेति संज्ञप्यमान आहुती जुहोति। प्राणानेवास्मिन्दधाति। नास्मात् प्राणा अपक्रामन्ति। अवन्तीस्थावन्तीस्त्वाऽवन्तु। प्रियन्त्वा प्रियाणाम्। वर्षिष्ठमाप्यानाम्। निधीनान्त्वा निधिपतिꣳ हवामहेवसोममेत्याह। अपैवास्मै तद्ध्नुवते। [२५]।।

अथो धुवन्त्येवैनम्। अथो न्येवास्मै ह्नुवते। त्रिः परियन्ति। त्रय इमे लोकाः। एभ्य एवैनँल्लोकेभ्यो धुवते। त्रिः पुनः

परियन्ति। षट्थ्संपद्यन्ते। षड्वा ऋतवः। ऋतुभिरेवैनन्धुवते। अप वा एतेभ्यः प्राणाः क्रामन्ति। [२६]।।

ये यज्ञे धुवनन्तन्वते। नवकृत्वः परियन्ति। नववै पुरुषे प्राणाः। प्राणानेवात्मन्दधते। नैभ्यः प्राणा अपक्रामन्ति। अंबे अंबाल्यंबिक इति पत्नीमुदानयति। अह्वतैवैनाम्। सुभगे कांपीलवासिनीत्याह। तप एवैनामुपनयति। सुवर्गे लोके सम्प्रोर्णवाथामित्याह। [२७]।।

सुवर्गमेवैनाँल्लोकङ्गमयति।
आऽहमजानि गर्भधमा त्वमजासि गर्भध-
मित्याह। प्रजा वै पशवो गर्भः। प्रजामेव
पशूनात्मन्धत्ते। देवा वा अश्वमेधे पवमाने।
सुवर्गँल्लोकन्न प्राजानन्न्। तमश्वः प्राजानात्।
यथ्सूचीभिरसि पथान्कल्पयन्ति। सुवर्गस्य
लोकस्य प्रज्ञात्यै। गायत्री त्रिष्टुब्जगतीत्याह।
[२८]।।

यथा यजुरेवैतत्। त्रय्यस्सूच्यो भवन्ति।
अयस्मय्यो रजताहरिण्यः। अस्य वै लोकस्य
रूपमयस्मय्यः। अन्तरिक्षस्य रजताः।

अश्वमेधः प्रश्नः(२)

दिवो हरिण्यः। दिशो वा अयस्मय्यः। अवान्तरदिशा रजताः। ऊद्ध्वा हरिण्यः। दिश एवास्मै कल्पयति। कस्त्वाच्छ्यति कस्त्वा विशास्तीत्याहाहिंसायै।। [२९]।।

(ह्नुवते क्रामन्त्यूण्वाथामित्याह जगतीत्याह कल्पयत्येकञ्च)।।

****

(७) अप वा एतस्माच्छ्री राष्ट्रङ्क्रामति। योऽश्वमेधेन यजते। ऊद्ध्र्वामेनामुच्छ्रयतादित्याह। श्रीर्वै राष्ट्रमश्वमेधः। श्रियमेवास्मै राष्ट्रमूद्ध्र्वमुच्छ्रयति। वेणुभारङ्गिराविवेत्याह। राष्ट्रँव्वै भारः। राष्ट्रमेवास्मै पर्यूहति। अथास्या मद्ध्यमेधतामित्याह। श्रीर्वै राष्ट्रस्य मद्ध्यम्। [३०]।।

श्रियमेवावरुन्धे। शीतेवाते पुनन्निवेत्याह। क्षेमोवै राष्ट्रस्य शीतोवातः। क्षेममेवावरुन्धे। यद्धरिणी यवमत्तीत्याह। विड्वै हरिणी।

अश्वमेधः प्रश्नः(२)

राष्ट्रँय्यवः। विशञ्चैवास्मै राष्ट्रञ्च समीची दधाति। नपुष्टं पशुमन्यत इत्याह। तस्माद्राजा पशूत्रपुष्यति। [३१]।।

शूद्रायदर्यजारानपोषायधनायतीत्याह। तस्माद्वैशीपुत्रन्नाभिषिञ्चन्ते। इयँय्यका शकुन्तिकेत्याह। विड्वै शकुन्तिका। राष्ट्रमश्वमेधः। विशञ्चैवास्मै राष्ट्रञ्च समीची दधाति। आहलमिति सर्पतीत्याह। तस्माद्राष्ट्राय विशस्सर्पन्ति। आहतङ्गभे पस इत्याह। विड्वै गभः। [३२]।।

राष्ट्रं पसः। राष्ट्रमेव विश्याहन्ति।

तस्माद्राष्ट्रँविशङ्घातुकम्। माता च ते पिता च त इत्याह। इयँव्वै माता। असौ पिता। आभ्यामेवैनं परिददाति। अग्रँ व्वृक्षस्य रोहत इत्याह। श्रीर्वै वृक्षस्याग्रम्। श्रियमेवावरुन्धे। [३३]।।

प्रसुलामीति ते पिता गभेमुष्टिमत ँ सयदित्याह। विड्वै गर्भः। राष्ट्रं मुष्टिः। राष्ट्रमेव विश्याहन्ति। तस्माद्राष्ट्रँ व्विशङ्घातुकम्। अप वा एतेभ्यः प्राणाः क्रामन्ति। ये यज्ञेऽपूतँव्वदन्ति। दधिक्राव्ण्णो अकारिषमिति सुरभिमतीमृचँ व्वदन्ति।

अश्वमेधः प्रश्नः(२)

प्राणा वै सुरभयः। प्राणानेवात्मन्दधते। नैभ्यः प्राणा अपक्रामन्ति। आपोहिष्ठा मयोभुव इत्यद्भि र्मार्जयन्ते। आपो वै सर्वा देवताः। देवताभिरेवात्मानं पवयन्ते।। [३४]।।

(राष्ट्रस्य मद्ध्यं पुष्यति गभो रुन्धे दधते चत्वारि च).।।

****

(८) प्रजापतिः प्रजास्सृष्ट्वा प्रेणाऽनु
प्राविशत्। ताभ्यः पुन स्संभवितु-न्नाशक्नोत्।
सोऽब्रवीत्। ऋद्ध्नवदित्थ्सः। योमेतः पुन-
स्संभरदिति। तन्देवा अश्वमेधेनैव समभरन्न्।
ततो वै त आर्द्ध्नुवन्न्। योऽश्वमेधेन यजते।
प्रजापतिमेव संभरत्यृद्ध्नोति। पुरुषमालभते।
[३५]।।

वैराजो वै पुरुषः। विराजमेवालभते।
अथो अन्नँ व्वै विराट्। अन्नमेवावरुन्धे।
अश्वमालभते। प्राजापत्यो वा अश्वः।
प्रजापतिमेवालभते। अथो श्रीर्वा एकशफम्।

श्रियमेवावरुन्धे। गामालभते। [३६]।।

यज्ञो वै गौः। यज्ञमेवालभते। अथो अन्नँ व्वै गौः। अन्नमेवावरुन्धे। अजावी आलभते भूम्ने। अथो पुष्टिर्वै भूमा। पुष्टिमेवावरुन्धे। पर्यग्निकृतं पुरुषञ्चारण्याँश्चोत्सृजन्त्यहिँसायै। उभौ वा एतौ पशू आलभ्येते। यश्चावमो यश्च परमः। [३७]।।

तेऽस्योभये यज्ञे बद्धाः। अभीष्टा अभिप्रीताः। अभिजिता अभिहुता भवन्ति। नैनन्दङ्क्ष्णवः पशवो यज्ञे बद्धाः। अभीष्टा अभिप्रीताः। अभिजिता अभिहुता हिँसन्ति।

योऽश्वमेधेन यजते। य उचैनमेवँव्वेद।।[३८]

(लभते गामालभते परमोऽष्टौ च)।।

(९) प्रथमेन वा एष स्तोमेन राद्ध्वा। चतुष्टोमेन कृतेनायानामुत्तरेऽहन्न्। एकवि ँ शे प्रतिष्ठायां प्रतितिष्ठति। एकवि ँ शात् प्रतिष्ठाया ऋतूनन्वारोहति। ऋतवो वै पृष्ठानि। ऋतव स्सँव्वथ्सरः। ऋतुष्वेव सँव्वथ्सरे प्रतिष्ठाय। देवता अभ्यारोहति। शक्वरयः पृष्ठं भवन्त्यन्यदन्यच्छन्दः। अन्येन्ये वा एते पशव आलभ्यन्ते।[३९]।। उतेव ग्राम्याः। उतेवारण्याः।

अहरेव रूपेण समर्द्धयति। अथो अह्न एवैष बलिर्ह्रियते। तदाहुः। अपशवो वा एते। यदजावयश्चारण्याश्च। एते वै सर्वे पशवः। यद्गव्या इति। गव्यान्पशूनुत्तमेऽहन्नालभते।। [४०]।।

तेनैवोभयान्पशूनवरुन्धे। प्राजापत्या भवन्ति। अनभिजितस्याभिजित्यै। सौरीर्नव श्वेतावशा अनूबन्ध्या भवन्ति। अन्तत एव ब्रह्मवर्चसमवरुन्धे। सोमाय स्वराज्ञेऽनोवाहा-वनड्वाहाविति द्वन्द्विनः पशूनालभते। अहो-रात्राणामभिजित्यै। पशुभिर्वा एष व्यृद्ध्यते।

योऽश्वमेधेन यजते। छगलङ्कल्माषङ्किकिदीविं विदीगयमिति त्वाष्ट्रान्पशूनालभते।। [४१]।।

पशुभिरेवात्मानꣳ समर्द्धयति। ऋतुभिर्वा एष व्यृद्ध्यते। योऽश्वमेधेन यजते। पिशङ्गास्त्रयो वासन्ता इत्यृतुपशूनालभते। ऋतुभिरेवात्मानꣳ समर्द्धयति। आवा एष पशुभ्यो वृश्च्यते। योऽश्वमेधेन यजते। पर्यग्निकृता उथ्सृजन्त्यनाव्रस्काय।। [४२]।।

(लभ्यन्ते लभते त्वाष्ट्रान्पशूनालभतेऽष्टौच)।।

****

(१०) प्रजापतिरकामयत महानन्नाद स्स्यामिति। स एतावश्वमेधे महिमानावपश्यत्। तावगृह्णीत। ततो वै स महानन्नादोऽभवत्। यः कामयेत महानन्नाद स्स्यामिति। स एतावश्वमेधे महिमानौ गृह्णीत। महानेवान्नादो भवति। यजमानदेवत्या वै वपा। राजा महिमा। यद्वपां महिम्नोभयतः परियजति। यजमानमेव राज्येनोभयतः परिगृह्णाति। पुरस्तात्स्वाहाकारा वा अन्ये देवाः। उपरिष्टात्स्वाहाकारा अन्ये। तेवा एतेऽश्व एव मेद्ध्य उभयेऽवरुद्ध्यन्ते।

यद्रूपां महिम्नोभयतःपरियजति। तानेवोभयान् प्रीणाति।। [४३]।। (परियजति षट्च)।।

****

(११) वैश्वदेवो वा अश्वः। तँय्यत्प्राजापत्यङ्कुर्यात्। या देवता अपिभागाः। ता भागधेयेन व्यर्द्धयेत्। देवताभ्य स्समदन्दद्ध्यात्। स्तेगान्दँष्ट्राभ्यां मण्डूकाञ्जंभ्येभिरिति। आज्यमवदानङ्कृत्वा प्रतिसङ्ख्याय -माहुती जुहोति। या एव देवता अपिभागाः। ता भागधेयेन समर्द्धयति। न देवताभ्य स्समदन्दधाति।। [४४]।।

चतुर्दशैतानननुवाका ञ्जुहोत्यनन्तरित्यै। प्रयासाय स्वाहेति पञ्चदशम्। पञ्चदश व्वा अर्द्धमासस्य रात्रयः। अर्द्धमासश स्सँव्वथ्सर आप्यते। देवासुरा स्सँय्यत्ता आसन्न्। तेऽब्रुवन्नग्नयं-स्स्विष्टकृतः। अश्वस्य मेद्ध्यस्य वयमुद्धार-मुद्धरामहै। अथैतानभि भवामेति। ते लोहितमुदहरन्त। ततो देवा अभवन्न्।। [४५]।।

पराऽसुराः। यथ्स्विष्टकृद्भ्यो लोहित ञ्जुहोति भ्रातृव्याभिभूत्यै। भवत्यात्मना। पराऽस्य भ्रातृव्यो भवति। गोमृगकण्ठेन

अश्वमेधः प्रश्नः(२)

प्रथमामाहुति ञ्जुहोति। पशवो वै गोमृगः। रुद्रोऽग्नि स्स्विष्टकृत्। रुद्रादेव पशूनन्त-र्दधाति। अथो यत्रैषाऽऽहुतिर् हूयते। न तत्र रुद्रः पशूनभिमन्यते।[४६]।।

अश्वशफेन द्वितीयामाहुति ञ्जुहोति। पशवो वा एकशफम्। रुद्रोऽग्नि स्स्विष्टकृत्। रुद्रादेव पशूनन्तर्दधाति। अथो यत्रैषाऽऽहुतिर् हूयते। न तत्र रुद्रः पशूनभि-मन्यते। अयस्मयेन कमण्डलुना तृतीयाम्। आहुति ञ्जुहोत्यायास्यो वै प्रजाः। रुद्रोऽग्नि स्स्विष्टकृत्। रुद्रादेव प्रजा अन्तर्दधाति।

अथो यत्रैषाऽऽहुतिर् हूयते। न तत्र रुद्रः प्रजा अभिमन्यते।। [४७]।। *(दधात्यभवन्मन्यते प्रजा अन्तर्दधाति द्वे च)।।*

****

(१२) अश्वस्य वा आलब्धस्य मेध उदक्रामत्। तदश्वस्तोमीयमभवत्। यदश्वस्तोमीयं ञ्जुहोति। समेधमेवैनमालभते। आज्येन जुहोति। मेधो वा आज्यम्। मेधोऽश्वस्तोमीयम्। मेधेनैवास्मिन्मेधन्दधाति। षट्त्रिꣳ शतं ञ्जुहोति। षट्त्रिꣳ शदक्षरा बृहती। [४८]।।

बार्हताः पशवः। सा पशूनां मात्रा। पशूनेव मात्रया समर्द्धयति। ता यद्भूयसीर्वा कनीयसीर्वा जुहुयात्। पशून्मात्रया व्यर्द्धयेत्। षटत्रिँशत ञ्जुहोति। षटत्रिँशदक्षरा बृहती। बार्हताः पशवः। सा पशूनां मात्रा। पशूनेव मात्रया समर्द्धयति।। [४९]।।

अश्वस्तोमीयँ हुत्वा द्विपदा जुहोति। द्विपाद्वै पुरुषो द्विप्रतिष्ठः। तदेनं प्रतिष्ठया समर्द्धयति। तदाहुः। अश्वस्तोमीयं पूर्वँ होतव्याँ (३) द्विपदाँ (३) इति। अश्वो वा अश्वस्तोमीयम्। पुरुषो द्विपदाः।

अश्वस्तोमीयꣳ हुत्वा द्विपदा जुहोति। तस्माद्द्विपाच्चतुष्पादमत्ति। अथो द्विपद्येव चतुष्पदः प्रतिष्ठापयति। द्विपदा हुत्वा। नान्यामुत्तरामाहुति ञ्जुहुयात्। यदन्यामुत्तरा-माहुति ञ्जुहुयात्। प्रप्रतिष्ठाया- श्च्यवेत। द्विपदा अन्ततो जुहोति प्रतिष्ठित्यै।। [५०]।।

(बृहत्यर्द्धयति स्थापयति पञ्च च)।।

****

(१३) प्रजापतिरश्वमेधमसृजत। सोऽस्माथ्सृष्टोऽपाक्रामत्। तँय्यज्ञक्रतुभिरन्वैच्छत्। तँय्यज्ञक्रतुभिर्नान्वविन्दत्। तमिष्टिभिरन्वैच्छत्। तमिष्टिभिरन्वविन्दत्। तदिष्टीनामिष्टित्वम्। यथ्सँव्वथ्सरमिष्टिभिर्यजते। अश्वमेव तदन्विच्छति। सावित्रियो भवन्ति।। [५१]।।

इयँव्वै सविता। यो वा अस्यान्नश्यति यो निलयते। अस्याँव्वाव तँव्विन्दन्ति। न वा इमाङ्कश्चनेत्याहुः। तिर्यङ्नोद्ध्वोऽत्येतुमर्हतीति। यथ्सावित्रियो भवन्ति।

सवितृप्रसूत एवैनमिच्छति। ईश्वरो वा अश्वः प्रमुक्तः परां परावतं ङ्गन्तोः। यथ्सायन्धृती-र्जुहोति। अश्वस्य यत्यै धृत्यै। [५२]।।

यत्प्रातरिष्टिभि र्यजते। अश्वमेव तदन्विच्छति। यथ्सायन्धृती र्जुहोति। अश्वस्यैव यत्यै धृत्यै। तस्माथ्सायं प्रजाः क्षेम्या भवन्ति। यत्प्रातरिष्टिभि र्यजते। अश्वमेव तदन्विच्छति। तस्माद्दिवा नष्टैष एति। यत्प्रातरिष्टिभि र्यजते सायन्धृती र्जुहोति। अहोरात्राभ्यामेवैनमन्विच्छति। अथो अहोरात्राभ्यामेवास्मै योगक्षेमङ्कल्पयति।। [५३]।।

[५३]।। (भवन्ति धृत्या एनमन्विच्छत्येकञ्च)।।

****

(१४) अपवा एतस्माच्छ्री राष्ट्रङ्क्रामति। योऽश्वमेधेन यजते। ब्राह्मणौ वीणागाथिनौ गायतः। श्रिया वा एतद्रूपम्। यद्वीणा। श्रियमेवास्मिन्तद्धत्तः। यदा खलु वै पुरुषश्श्रियमश्नुते। वीणास्मै वाद्यते। तदाहुः। यदुभौ ब्राह्मणौ गायेताम्।। [५४]।।

प्रभ्र ँ शुकाऽस्माच्छ्रीस्स्यात्। न वै ब्राह्मणे श्रीरमत इति। ब्राह्मणोऽन्यो गायेत्। राजन्योऽन्यः। ब्रह्म वै ब्राह्मणः।

क्षत्रꣳ राजन्यः। तथाहास्य ब्रह्मणा च क्षत्रेण चोभयतश्श्रीः परिगृहीता भवति। तदाहुः। यदुभौ दिवा गायेताम्। अपास्माद्राष्ट्रङ्क्रामेत्। [५५]॥

न वै ब्राह्मणे राष्ट्रꣳ रमत इति। यदा खलु वै राजा कामयते। अथ ब्राह्मणञ्जिनाति। दिवा ब्राह्मणो गायेत्। नक्तꣳ राजन्यः। ब्रह्मणो वै रूपमहः। क्षत्रस्य रात्रिः। तथाहास्य ब्रह्मणा च क्षत्रेण चोभयतो राष्ट्रं परिगृहीतं भवति। इत्यददा इत्ययजथा इत्यपच इति ब्राह्मणो गायेत्। इष्टापूर्तँव्वै

ब्राह्मणस्य। [५६]।।

इष्टापूर्तेनैवैनꣳ स समर्द्धयति। इत्यजिना इत्ययुद्ध्यथा इत्यमुꣳ सङ्ग्राममहन्निति राजन्यः। युद्धँव्वै राजन्यस्य। युद्धेनैवैनꣳ स समर्द्धयति। अक्लृप्ता वा एतस्यर्तव इत्याहुः। योऽश्वमेधेन यजत इति। तिस्रोऽन्यो गायति तिस्रोऽन्यः। षट्थ्संपद्यन्ते। षड्वा ऋतवः। ऋतूनेवास्मै कल्पयतः। ताभ्याꣳ सꣳस्थायाम्। अनोयुक्ते च शते च ददाति। शतायुः पुरुषश्शतेन्द्रियः। आयुष्येवेन्द्रिये प्रतितिष्ठति।। [५७]।।

(गायेताङ्क्रामेद्ब्राह्मणस्य कल्पयतश्चत्वारि च)।।

****

(१५) सर्वेषुवा एषु लोकेषु मृत्यवो-
ऽन्वायत्ताः। तेभ्यो यदाहुतीर्न जुहुयात्।
लोकेलोक एनं मृत्युर्विन्देत्। मृत्यवे स्वाहा
मृत्यवे स्वाहेत्यभिपूर्वमाहुती जुहोति।
लोकाल्लोकादेव मृत्युमवयजते। नैनँल्लोके-
लोके मृत्युर्विन्दति। यदमुष्मै स्वाहाऽमुष्मै
स्वाहेति जुह्वथ्सञ्चक्षीत। बहुं मृत्युममित्रङ्-
कुर्वीत। मृत्यवे स्वाहेत्येकस्मा एवैकाञ्जुहु-
यात्। एको वा अमुष्मिँल्लोके मृत्युः।[५८]।

अशनया मृत्युरेव। तमेवामुष्मिँल्लोके-ऽवयजते। भ्रूणहत्यायै स्वाहेत्यवभृथ आहुति-ञ्जुहोति। भ्रूणहत्यामेवावयजते। तदाहुः। यद्भ्रूणहत्याऽपात्र्याऽथ। कस्माद्यज्ञेऽपि क्रियत इति। अमृत्युर्वा अन्यो भ्रूणहत्याया इत्याहुः। भ्रूणहत्या वाव मृत्युरिति। यद्भ्रूणहत्यायै स्वाहेत्यवभृथ आहुतिञ्जुहोति।। [५९]।।

मृत्युमेवाहुत्या तर्पयित्वा परिपाणङ्कृत्वा। भ्रूणघ्ने भेषजङ्करोति। एताॅं हवै मुण्डिभ औदन्यवः। भ्रूणहत्यायै प्रायश्चित्तिँ व्विदा-ञ्चकार। योहास्यापि प्रजायां ब्राह्मणॅं हन्ति।

सर्वस्मै तस्मै भेषजङ्करोति। जुंबकाय स्वाहेत्यवभृथ उत्तमामाहुतिञ्जुहोति। वरुणो वै जुंबकः। अन्तत एव वरुणमवयजते। खलतेर्विक्लिधस्य शुक्लस्य पिङ्गाक्षस्य मूर्द्धञ्जुहोति। एतद्वै वरुणस्य रूपम्। रूपेणैव वरुणमवयजते।। [६०]।।

(लोके मृत्युर्जुहोति मूर्द्धञ्जुहोति द्वे च)।।

****

(१६) वारुणो वा अश्वः। तन्देवतया व्यर्द्धयति। यत्प्राजापत्यङ्करोति। नमो राज्ञे नमो वरुणायेत्याह। वारुणो वा अश्वः। स्वयैवैनन्देवतया समर्द्धयति। नमोऽश्वाय नमः प्रजापतय इत्याह। प्राजापत्यो वा अश्वः। स्वयैवैनन्देवतया समर्द्धयति। नमोऽधिपतय इत्याह। [६१]।।

धर्मो वा अधिपतिः। धर्ममेवावरुन्धे। अधिपतिरस्यधिपतिं मा कुर्वधिपतिरहं प्रजानां भूयासमित्याह। अधिपतिमेवैन ँ समानाना-

करोति। मान्धेहि मयि धेहीत्याह। आशिष-
मेवैतामाशास्ते। उपाकृताय स्वाहेत्युपाकृते
जुहोति। आलब्धाय स्वाहेति नियुक्ते जुहोति।
हुताय स्वाहेति हुते जुहोति। एषाँल्लोकाना-
मभिजित्यै। [६२]।।

प्रवा एष एभ्यो लोकेभ्यश्च्यवते।
योऽश्वमेधेन यजते। आग्नेयमैन्द्राग्नमाश्विनम्।
तान्पशूनालभते प्रतिष्ठित्यै। यदाग्नेयो
भवति। अग्निस्सर्वा देवताः। देवता
एवावरुन्धे। ब्रह्म वा अग्निः। क्षत्रमिन्द्रः।
यदैन्द्राग्नो भवति।। [६३]।।

ब्रह्मक्षत्रे एवावरुन्धे। यदाश्विनो भवति। आशिषामवरुद्ध्यै। त्रयो भवन्ति। त्रय इमे लोकाः। एष्वेव लोकेषु प्रतितिष्ठति। अग्नये ऽꣳहोमुचेऽष्टाकपाल इति दशहविषमिष्टिन्निर्वपति। दशाक्षरा विराट्। अन्नँव्विराट्। विराजैवान्नाद्यमवरुन्धे। अग्नेर्मन्वे प्रथमस्य प्रचेतस इति याज्यानुवाक्या भवन्ति सर्वत्वाय।। [६४]।।

(अधिपतय इत्याहाभिजित्या ऐन्द्राग्नो भवति रुन्ध एकञ्च)।।

****

(१७) यद्यश्वमुपतपद्विन्देत्।
आग्नेयमष्टाकपाल-न्निर्वपेत्। सौम्यञ्चरुम्।
सावित्रमष्टाकपालम्। यदाग्नेयो भवति।
अग्निस्सर्वादेवताः। देवताभिरेवैनं भिषज्यति।
यथ्सौम्यो भवति। सोमो वा ओषधीनाꣳ
राजा। याभ्य एवैनँ व्विन्दति।। [६५]।।
ताभिरेवैनं भिषज्यति। यथ्सावित्रो
भवति। सवितृप्रसूत एवैनं भिषज्यति।
एताभिरेवैनन्देवताभि र्भिषज्यति। अगदो हैव
भवति। पौष्णञ्चरु- न्निर्वपेत्।

यदि श्लोणस्स्यात्। पूषा वै श्लौण्यस्य भिषक्। स एवैनं भिषज्यति। अश्लोणो हैव भवति।। [६६]।।

रौद्रञ्चरुन्निर्वपेत्। यदि महती देवताऽभिमन्येत। एतद्देवत्यो वा अश्वः। स्वयैवैन- न्देवतया भिषज्यति। अगदो हैव भवति। वैश्वानर- न्द्वादशकपाल- न्निर्वपे- न्मृगाखरे यदि नागच्छेत्। इयँव्वा अग्नि वैश्वानरः। इयमेवैनमर्चिभ्यां परिरोध- मानयति। आहैव सुत्यमहर्गच्छति। यद्यधीयात्।। [६७]।।

अग्नयेऽँ होमुचेऽष्टाकपालः। सौर्यं पयः। वायव्य आज्यभागः। यजमानो वा अश्वः। अँहसा वा एष गृहीतः। यस्याश्वो मेधाय प्रोक्षितोऽद्ध्येति। यदँ होमुचे निर्वपति। अँ हस एव तेन मुच्यते। यजमानो वा अश्वः। रेतसा वा एष व्यृद्ध्यते।। [६८]।।

यस्याश्वो मेधाय प्रोक्षितोऽद्ध्येति। सौर्यँ रेतः। यथ्सौर्यं पयो भवति। रेतसैवैनँ स समर्द्धयति। यजमानो वा अश्वः। गर्भैर्वा एष व्यृद्ध्यते। यस्याश्वो मेधाय

प्रोक्षितोऽद्ध्येति। वायव्या गर्भाः। यद्वायव्य आज्यभागो भवति। गर्भैरेवैनꣳ ससमर्द्धयति। अथो यस्यैषाऽश्वमेधे प्रायश्चित्तिः क्रियते। इष्ट्वा वसीयान्भवति।। [६९]।।

(विन्दत्यश्लोणो हैव भवत्यधीयादृद्ध्यते गर्भैरेवैनꣳ ससमर्द्धयति द्वे च)।।

****

(१८) तदाहुः। द्वादश ब्रह्मौदनान्-
थ्स ॐ स्थिते निर्वपेत्। द्वादशभि र्वेष्टिभि
र्यजेतेति। यदिष्टिभिर्यजेत। उपनामुक एनँ-
य्यज्ञस्स्यात्। पापीया ॐ स्तु स्यात्। आप्तानि
वा एतस्य छन्दा ॐ सि। य ईजानः। तानि क
एतावदाशु पुनः प्रयुञ्जीतेति। सर्वा वै
स ॐ स्थिते यज्ञे वागाप्यते।[७०]।।

साऽऽप्ता भवति यातयाम्नी। क्रूरीकृतेव
हि भवत्यरुष्कृता। सान पुनः प्रयुज्येत्याहुः।
द्वादशैव ब्रह्मौदनान् थ्स ॐ स्थिते निर्वपेत्।
प्रजापतिर्वा ओदनः। यज्ञः प्रजापतिः।

उपनामुक एनँय्यज्ञो भवति। न पापीयान्भवति। द्वादश भवन्ति। द्वादश मासास्सँव्वथ्सरः। सँव्वथ्सर एव प्रतितिष्ठति।।

[७१]।। (आप्यते सव्वँथ्सर एकञ्च)।।

****

(१९) एष वै विभूर्नाम यज्ञः। सर्वꣳ हवै तत्र विभु भवति। यत्रैतेन यज्ञेन यजन्ते।

एष वै प्रभूर्नाम यज्ञः। सर्वꣳहवै तत्र प्रभु भवति। यत्रैतेन यज्ञेन यजन्ते।

एष वा ऊर्जस्वान्नाम यज्ञः। सर्वꣳ हवै तत्रोर्जस्वद् भवति। यत्रैतेन यज्ञेन यजन्ते।

एष वै पयस्वान्नाम यज्ञः। [७२]।। सर्वꣳ ह वै तत्र पयस्वद् भवति। यत्रैतेन यज्ञेन यजन्ते।

एष वै विधृतो नाम यज्ञः। सर्वꣳहवै तत्र

विधृतं भवति। यत्रैतेन यज्ञेन यजन्ते।

एष वै व्यावृत्तो नाम यज्ञः। सर्वꣳ हवै तत्र व्यावृत्तं भवति। यत्रैतेन यज्ञेन यजन्ते।

एष वै प्रतिष्ठितो नाम यज्ञः। सर्वꣳहवै तत्र प्रतिष्ठितं भवति। [७३]।। यत्रैतेन यज्ञेन यजन्ते।

एष वै तेजस्वी नाम यज्ञः। [७२]।। सर्वꣳ ह वै तत्र तेजस्वि भवति। यत्रैतेन यज्ञेन यजन्ते।

एष वै ब्रह्मवर्चसी नाम यज्ञः। आह वै तत्र ब्राह्मणो ब्रह्मवर्चसी जायते। यत्रैतेन

यज्ञेन यजन्ते।

एष वा अतिव्याधी नामयज्ञः। आहवै तत्र राजन्योऽतिव्याधी जायते। यत्रैतेन यज्ञेन यजन्ते।

एष वै दीर्घो नाम यज्ञः। दीर्घायुषो हवै तत्र मनुष्या भवन्ति। यत्रैतेन यज्ञेन यजन्ते।

एष वै क्लृप्तो नाम यज्ञः। कल्पते ह वै तत्र प्रजाभ्यो योगक्षेमः। यत्रैतेन यज्ञेन यजन्ते।। [७४]।।

अश्वमेधः प्रश्नः(२)

(पयस्वान्नाम यज्ञः प्रतिष्ठितं भवत्यतिव्याधी जायते यत्रैतेन यज्ञेन यजन्ते षट्च)।।

[एष वै विभूः प्रभूरूर्जस्वान्पयस्वान् विधृतो व्यावृत्तः प्रतिष्ठित स्तेजस्वी ब्रह्मवर्चस्य-तिव्याधी दीर्घः क्लृप्तो द्वादश)।।

****

(२०) तार्प्येणाश्वꣳ संज्ञपयन्ति। यज्ञो वै तार्प्यम्। यज्ञेनैवैनꣳ समर्द्धयन्ति। यामेन साम्ना प्रस्तोताऽनूपतिष्ठते। यमलोकमेवैनङ्गमयति। तार्प्ये च कृत्यधीवासे चाश्वꣳ संज्ञपयन्ति। एतद्वै पशूनाꣳ रूपम्। रूपेणैव पशूनवरुन्धे। हिरण्यकशिपु भवति। तेजसोऽवरुद्ध्यै। [७५]।।

रुक्मो भवति। सुवर्गस्य लोकस्यानुख्यात्यै। अश्वो भवति। प्रजापतेराप्त्यै। अस्य वै लोकस्य रूपन्तार्प्यम्। अन्तरिक्षस्य कृत्यधीवासः। दिवो हिरण्यकशिपु।

आदित्यस्य रुक्मः। प्रजापतेरश्वः। इममेव लोकन्तार्प्येणाप्नोति। [७६]।।

अन्तरिक्षङ्कृत्यधीवासेन। दिवꣳ हिरण्य-कशिपुना। आदित्यꣳ रुक्मेण। अश्वेनैव मेद्ध्येन प्रजापते स्सायुज्यꣳ सलोकता-माप्नोति। एतासामेव देवतानाꣳ सायुज्यम्। सार्ष्टिताꣳ समानलोकतामाप्नोति। योऽश्वमेधेन यजते। य उचैनमेवँव्वेद।।[७७]

(अवरुद्ध्या आप्नोत्यष्टौ च)।।

****

(२१) आदित्याश्चाङ्गिरसश्च सुवर्गे लोकेऽस्पर्द्धन्त। तेऽङ्गिरस आदित्येभ्यः। अमुमादित्यमश्वꣳ श्वेतं भूतन्दक्षिणामनयन्न्। तेऽब्रुवन्न्। यन्नोऽनेष्ट। सवर्योऽभूदिति। तस्मादश्वꣳ सवर्येत्याह्वयन्ति। तस्माद्यज्ञे वरो दीयते। यत्प्रजापतिरालब्धोऽश्वोऽभवत्। तस्मादश्वो नाम। [७८]।।

यच्छ्वयदरुरासीत्। तस्मादर्वा नाम। यथ्सद्यो वाजान्थ्समजयत्। तस्माद्वाजी नाम। यदसुराणाँल्लोकानादत्त। तस्मादादित्यो नाम। अग्निर्वा अश्वमेधस्य योनिरायतनम्।

अश्वमेधः प्रश्नः(२)

सूर्योऽग्ने योनिरायतनम्। यदश्वमेधेऽग्नौचित्य उत्तरवेदिमुपवपति। योनिमन्तमेवैन- मायतन-वन्तङ्करोति। [७९]।।

योनिमानायतनवान्भवति। य एवव्वँद। प्राणापानौ वा एतौ देवानाम्। यदर्काश्वमेधौ। प्राणापानावेवावरुन्धे। ओजो बलव्वाँ एतौ देवानाम्। यदर्काश्वमेधौ। ओजो बलमेवाव-रुन्धे। अग्निर्वा अश्वमेधस्य योनिरायतनम्। सूर्योऽग्ने योनिरायतनम्। यदश्वमेधे ऽग्नौ चित्य उत्तरवेदिञ्चिनोति। तावर्काश्वमेधौ। अर्काश्वमेधावेवावरुन्धे। अथो अर्काश्व-

मेधयोरेव प्रतितिष्ठति।। [८०]।।
(नाम करोति सूर्योऽग्ने योनिरायतनञ्चत्वारि च)।।

****

(२२) प्रजापतिँव्वै देवाः पितरम्। पशुं भूतं मेधायालभन्त। तमालभ्योपावसन्न्। प्रातर्यष्टास्मह इति। एकँव्वा एतद्देवानामहः। यथ्सँव्वथ्सरः। तस्मादश्वः पुरस्ताथ्सँव्वथ्सर आलभ्यते। यत्प्रजापतिरालब्धोऽश्वोऽभवत्। तस्मादश्वः। यथ्सद्यो मेधोऽभवत्। [८१]।।

तस्मादश्वमेधः। वेदुकोऽश्वमाशुं भवति। य एवँव्वेद। यद्वैतत् प्रजापति- रालब्धो-

ऽश्वोऽभवत्। तस्मादश्वः प्रजापतेः पशूना-
मनुरूपतमः। आऽस्य पुत्रः प्रतिरूपो जायते।
य एवँव्वेद। सर्वाणि भूतानि संभृत्यालभते।
समेनन्देवा स्तेजसे ब्रह्मवर्चसाय भरन्ति।
योऽश्वमेधेन यजते।। [८२]।।

य उचैनमेवँव्वेद। एतद्वै तद्देवा
एतान्देवताम्। पशुं भूतं मेधायालभन्त।
यज्ञमेव। यज्ञेन यज्ञमयजन्त देवाः।
कामप्रय्यँज्ञमकुर्वत। तेऽमृतत्वमकामयन्त।
तेऽमृतत्वमगच्छन्न्। योऽश्वमेधेन यजते।

देवानामेवायनेनैति। [८३]।।

प्राजापत्येनैव यज्ञेन यजते काम्प्रेण। अपुनर्मारमेव गच्छति। एतस्य वै रूपेण पुरस्तात्प्राजापत्यमृषभन्तूपरं बहुरूपमालभते। सर्वेभ्यः कामेभ्यः। सर्वस्याप्त्यै। सर्वस्य जित्यै। सर्वमेव तेनाप्नोति। सर्वञ्जयति। योऽश्वमेधेन यजते। य उ चैनमेवँव्वेद। [८४]

(मेधोऽभवद्यजत एति वेद)।।

(२३) यो वा अश्वस्य मेद्ध्यस्य
लोमनी वेद। अश्वस्यैव मेद्ध्यस्य
लोमँल्लोमञ्जुहोति। अहोरात्रे वा अश्वस्य
मेद्ध्यस्य लोमनी। यथ्सायं प्रातर्जुहोति।
अश्वस्यैव मेद्ध्यस्य लोमँल्लोमञ्जुहोति।
एतदनुकृतिहस्म वै पुरा। अश्वस्यमेद्ध्यस्य
लोमँल्लोमञ्जुह्वति। यो वा अश्वस्य
मेद्ध्यस्य पदे वेद। अश्वस्यैव मेद्ध्यस्य
पदेपदे जुहोति। दर्शपूर्णमासौ वा अश्वस्य
मेद्ध्यस्य पदे।। [८५]।।

यद्दर्शपूर्णमासौ यजते। अश्वस्यैव मेद्ध्यस्य पदेपदे जुहोति। एतदनुकृतिहस्म वै पुरा। अश्वस्य मेद्ध्यस्य पदेपदे जुह्वति। यो वा अश्वस्य मेद्ध्यस्य विवर्तनँव्वेद। अश्वस्यैव मेद्ध्यस्य विवर्तने विवर्तने जुहोति। असौ वा आदित्योऽश्वः। स आहवनीयमा-गच्छति। तद्विवर्तते। यदग्निहोत्र- ञ्जुहोति। अश्वस्यैव मेद्ध्यस्य विवर्तने विवर्तने जुहोति। एतदनुकृतिहस्म वै पुरा। अश्वस्य मेद्ध्यस्य विवर्तने विवर्तने जुह्वति।[८६]।।

(पदे अग्निहोत्रञ्जुहोति त्रीणि च)।।

अश्वमेधः प्रश्नः(२)

प्रजापतिस्तमष्टादशिभिःप्रजापतिरकामयतोभावस्मै
युञ्जन्ति तेजसाऽपप्राणा अपश्रीरूद्ध्र्वां प्रजापतिः
प्रेणानु प्रथमेन प्रजापतिरकामयत महान् वैश्वदेवो वा
अश्वोऽश्वस्य प्रजापति स्ताँय्यज्ञक्रतुभिरपश्री ब्राँह्मणौ
सर्वेषुवारुणो यद्यश्वन्तदाहुरेषवै विभूस्तार्प्येणादित्याः
प्रजापतिँ व्वै देवाः पितरँ य्यो वा अश्वस्य मेद्ध्यस्य
लोमनी त्रयोविँशतिः।। २३ ।। प्रजापतिरस्मिँल्लोक
उत्तरत श्श्रियमेव तेनैवोभयान् प्रजापतिरश्वमेधँ-
व्वारुणो वा अश्वस्साऽऽप्ता भवति प्रजापतिँ व्वै देवाः
पितरँ षडशीतिः।।८६।। प्रजापतिरश्वमेधञ्जुहवति।।

।। हरिः ओ(३)म् ।।

(इति तैत्तिरीय यजुर्ब्राह्मणे तृतीयाष्टके नवमः प्रश्नः समाप्तः।।

****

।। तृतीयाष्टके चतुर्थः प्रश्नः ।।

१. ब्रह्मणे ब्राह्मणमालभते। क्षत्राय राजन्यम्। मरुद्भ्यो वैश्यम्। तपसे शूद्रम्। तमसे तस्करम्। नारकाय वीरहणम्। पाप्मने क्लीबम्। आक्रयायायोगूम्। कामाय पुꣳश्चलूम्। अतिक्रुष्टाय मागधम्।।[१]।।

२. गीताय सूतम्। नृत्ताय शैलूषम्। धर्माय सभाचरम्। नर्माय रेभम्। नरिष्ठायै भीमलम्। हसाय कारिम्। आनन्दाय स्त्रीषखम्। प्रमुदे कुमारीपुत्रम्। मेधायै रथकारम्। धैर्याय तक्षाणम्।। [२]।।

३. श्रमाय कौलालम्। मायायै कार्मारम्। रूपाय मणिकारम्। शुभे वपम्। शरव्याया इषुकारम्। हेत्यै धन्वकारम्। कर्मणे ज्याकारम्। दिष्टाय रज्जुसर्गम्। मृत्यवे मृगयुम्। अन्तकाय श्वनितम्। [३]।।

४. सन्धये जारम्। गेहायोपपतिम्। निर्ऋत्यै परिवित्तम्। आर्त्यै परिविविदानम्। अराद्ध्यै दिधिषूपतिम्। पवित्राय भिषजम्। प्रज्ञानाय नक्षत्रदर्शम्। निष्कृत्यै पेशस्कारीम्। बलायोपदाम्। वर्णायानूरुधम्। [४]।।

।। तृतीयाष्टके चतुर्थः प्रश्नः।।

५. नदीभ्यः पौञ्जिष्टम्। ऋक्षीकाभ्यो नैषादम्। पुरुषव्याघ्राय दुर्मदम्। प्रयुद्भ्य उन्मत्तम्। गन्धर्वाप्सराभ्यो व्रात्यम्। सर्पदेवजनेभ्योऽप्रतिपदम्। अवेभ्यः कितवम्। इर्यताया अकितवम्। पिशाचेभ्यो बिदलकारम्। यातुधानेभ्यः कण्टककारम्। [५]।।

६. उथ्सादेभ्यः कुब्जम्। प्रमुदे वामनम्। द्वार्भ्य-स्स्रामम्। स्वप्नायान्धम्। अधर्माय बधिरम्। संज्ञानाय स्मरकारीम्।

प्रकामोद्यायोपसदम्। आशिक्षायै प्रश्निनम्। उपशिक्षाया अभिप्रश्निनम्। मर्यादायै प्रश्नविवाकम्। [६]।।

७. ऋत्यै स्तेनहृदयम्। वैरहत्याय पिशुनम्। विवित्त्यै क्षत्तारम्। औपद्रष्टाय सङ्ग्रहीतारम्। बलायानुचरम्। भूम्ने परिष्कन्दम्। प्रियाय प्रियवादिनम्। अरिष्ट्या अश्वसादम्। मेधाय वासः पल्पूलीम्। प्रकामाय रजयित्रीम्।। [७]।।

।। तृतीयाष्टके चतुर्थः प्रश्नः।।

८. भायै दार्वाहारम्। प्रभाया आग्नेन्धम्। नाकस्यपृष्ठायाभिषेक्तारम्। ब्रद्ध्नस्यविष्टपाय पात्रनिर्णेगम्। देवलोकाय पेशितारम्। मनुष्यलोकाय प्रकरितारम्। सर्वेभ्यो लोकेभ्य उपसेक्तारम्। अवर्त्यै-वधायोपमन्थितारम्। सुवर्गाय लोकाय भागदुघम्। वर्षिष्ठाय नाकाय परिवेष्टारम्। [८]।।

९. अर्मेभ्यो हस्तिपम्। जवायाश्वपम्। पुष्ट्यै गोपालम्। तेजसेऽजपालम्।

वीर्यायाविपालम्। इरायै कीनाशम्। कीलालाय सुराकारम्। भद्राय गृहपम्। श्रेयसे वित्तधम्। अद्ध्यक्षायानुक्षत्तारम्।[९]।

१०. मन्यवेऽयस्तापम्। क्रोधायनिसरम्। शोकायाभिसरम्। उत्कूलविकूलाभ्यान्त्रिस्थिनम्। योगाय योक्तारम्। क्षेमाय विमोक्तारम्। वपुषे मानस्कृतम्। शीलायाञ्जनीकारम्। निर्ऋत्यै कोशकारीम्। यमायासूम्।। [१०]।।

११. यम्यै यमसूम्। अथर्वभ्योऽवतोकाम्। सँव्वथ्सराय पर्यारिणीम्। परिवथ्सरायाविजाताम्। इदावथ्सरायापस्कद्वरीम्। इद्वथ्सरायातीत्वरीम्। वथ्सराय विजर्जराम्। सर्वन्थ्सराय पलिक्नीम्। वनाय वनपम्। अन्यतोरण्याय दावपम्। [११]।।

१२. सरोभ्यो धैवरम्। वेशन्ताभ्यो दाशम्। उपस्थावरीभ्यो बैन्दम्। नड्वलाभ्य श्शौष्कलम्। पार्याय कैवर्तम्। अवार्याय मार्गारम्। तीर्थेभ्य आन्दम्। विषमेभ्यो

मैनालम्। स्वनेभ्यः पर्णकम्। गुहाभ्यः किरातम्। सानुभ्यो जंभकम्। पर्वतेभ्यः किंपूरुषम्। [१२] ।।

१३. प्रतिश्रुत्कायाऋतुलम्। घोषाय भषम्। अन्ताय बहुवादिनम्। अनन्ताय मूकम्। महसे वीणावादम्। क्रोशाय तूणवद्ध्मम्। आक्रन्दाय दुन्दुभ्या घातम्। अवरस्पराय शङ्खद्ध्मम्।ऋभुभ्यो ऽजिन सन्धायम्। साद्ध्येभ्य श्चर्मम्णम्।। [१३] ।।

।। तृतीयाष्टके चतुर्थः प्रश्नः।।

१४. बीभत्साये पौल्कसम्। भूत्यै जागरणम्। अभूत्यै स्वपनम्। तुलायै वाणिजम्। वर्णाय हिरण्यकारम्। विश्वेभ्यो देवेभ्यस्सिद्ध्मलम्। पश्चाद्दोषाय ग्लावम्। ऋत्यै जनवादिनम्। व्यृद्ध्या अपगल्भम्। सꣳशराय प्रच्छिदम्। [१४]।।

१५. हसाय पुꣳश्चलूमालभते। वीणावादङ्गणकङ्गीताय। यादसेशाबुल्याम्। नर्माय भद्रवतीम्। तूणवद्ध्मङ्ग्रामण्यं पाणिसङ्घातन्नृत्ताय। मोदायानुक्रोशकम्। आनन्दाय तलवम्। [१५]।।

१६. अक्षराजायकितवम्। कृताय सभाविनम्। त्रेताया आदिनवदर्शम्। द्वापराय बहिस्सदम्। कलये सभास्थाणुम्। दुष्कृताय चरकाचार्यम्। अद्ध्वने ब्रह्मचारिणम्। पिशाचेभ्य स्सैलगम्। पिपासायै गोव्यच्छम्। निर्ऋत्यै गोघातम्। क्षुधे गोविकर्तम्। क्षुत्तृष्णाभ्यान्तम्। योगाँ-स्विकृन्तन्तं मा॒ँ सं भिक्षमाण उपतिष्ठते। [१६]।।

१७. भूम्यै पीठसर्पिणमालभते।
अग्नये ँ सलम्। वायवे चाण्डालम्।
अन्तरिक्षाय वँश नर्तिनम्। दिवेखलतिम्।
सूर्याय हर्यक्षम्। चन्द्रमसे मिर्मिरम्।
नक्षत्रेभ्यः किलासम्। अह्नेशुक्लंपिङ्गलम्।
रात्रियै कृष्णं पिङ्गाक्षम्।। [१७]।।

१८. वाचे पुरुषमालभते।
प्राणमपानँ- व्यानमुदानँ समानन्तान्
वायवे। सूर्याय चक्षुरालभते। मनश्चन्द्रमसे।
दिग्भ्यश्श्रोत्रम्। प्रजापतये पुरुषम्।। [१८]।।

१९. अथैतानरूपेभ्य आलभते। अतिह्रस्वमतिदीर्घम्। अतिकृशमत्य॑ँसलम्। अतिशुक्लमतिकृष्णम्। अतिश्लक्ष्णमतिलोमशम्। अतिकिरिटमतिदन्तुरम्। अतिमिर्मिरमतिमेमिषम्। आशायै जामिम्। प्रतीक्षायै कुमारीम्।। [१९]।। *******

[ब्रह्मणेगीतायश्रमायसन्धये नदीभ्य उथ्सादेभ्य ऋत्यै भाया अर्मेभ्यो मन्यवे यम्यै दशदश सरोभ्यो द्वादश प्रतिशुत्कायै बीभथ्सायै दशदश हसायसप्ताक्षराजाय त्रयोदश भूम्यै दश वाचे षडथ नवैकान्नवि॑ँशतिः।।१९।। ब्रह्मणे यम्यै नवदश।। ।।१९।।] ब्रह्मणे कुमारीम्।। हरिः ओ(३)म्।।

इति तैत्तिरीययजुर्ब्राह्मणे चतुर्थः प्रश्नः समाप्तः।।

****